# संस्कृतवल्लरी

## नवमश्रेणीनिमित्तम्

## तृतीयभाषा-संस्कृत-पाठ्यपुस्तकम्

प्रकाशिका

**माध्यमिकशिक्षापरिषद्, ओडिशा**

# संस्कृतवल्लरी

**नवमश्रेणीनिमित्तम्**

**तृतीयभाषा-संस्कृतपाठ्यपुस्तकम्**

**ओडिशामाध्यमिकशिक्षापरिषदा नवमश्रेणीनिमित्तम् अनुमोदितं प्रकाशितं च ।**

**© माध्यमिकशिक्षापरिषद्, ओडिशा**

लेखक-संपादकमण्डली

**डक्टर भरत चन्द्र नाथ** (समीक्षक:)
**पण्डित भास्कर चन्द्र महापात्र** (लेखक:)
**डक्टर विपिन विहारी शतपथी** (लेखक:)
**डक्टर गौतम महारणा** (लेखक:)
**पण्डित ज्ञानरञ्जन शतपथी** (संयोजक:)

ଲେଖକ-ସଂପାଦକମଣ୍ଡଳୀ

ଡକ୍ଟର ଭରତ ଚନ୍ଦ୍ର ନାଥ (ସମୀକ୍ଷକ)
ପଣ୍ଡିତ ଭାସ୍କର ଚନ୍ଦ୍ର ମହାପାତ୍ର (ଲେଖକ)
ଡକ୍ଟର ବିପିନ ବିହାରୀ ଶତପଥୀ (ଲେଖକ)
ଡକ୍ଟର ଗୌତମ ମହାରଣା (ଲେଖକ)
ପଣ୍ଡିତ ଜ୍ଞାନରଞ୍ଜନ ଶତପଥୀ (ସଂଯୋଜକଃ)

प्रथमसंस्करणम् - 2012
2019

अक्षरसज्जा - **Bani Press, Cuttack**

मुद्रणम् -

मूल्यम् -

# पुरोवाक्

राज्यपाठ्यचर्यारूपरेखा (2007) राष्ट्रियपाठ्यचर्यारूपरेखाम् अनुसृत्य परिकल्पिता अस्ति । राष्ट्रियमाध्यमिकशिक्षा (RMS) कार्यक्रमानुसारं विद्यार्थिनां विद्यालयजीवनं व्यापकं भवेदिति योजना अङ्गीकृता । विद्यार्थिजीवने सामाजिकसमरसता भवेत् इति विचार्य परिवारतः आरभ्य शिक्षायतनमाध्यमेन समाजस्य सर्वस्मिन् क्षेत्रे सम्बन्धस्थापनाय राष्ट्रियमाध्यमिकशिक्षाकार्यक्रमः परिकल्पितः । शिक्षकान् छात्रान् च अन्तरा व्यवधानं दूरीकृत्य छात्राणाम् उन्मुखीकरणम् आवश्यकम् । अध्ययन-अध्यापननिमित्तं पाठ्यपुस्तकानां निर्माणम् एकं गुरुत्वपूर्णं कार्यम् । मनस्तत्त्वदृष्ट्या पाठं प्रति छात्राणाम् अभिरुचिवर्धनं श्रवण-कथन-पठन-लेखनविधिमाध्यमेन करणीयम् । अयम् अभिनवप्रयोगः अभिनन्दनीयः ।

विद्यार्थिनां रुचिविकाशाय आचार्याणां प्रोत्साहनं नितरामावश्यकम् । विद्यार्थिनां ज्ञानाभिवृद्धये उपादेयप्रश्नमाध्यमेन शिक्षकाः तान् प्रेरयेयुः । अत्रापि निर्धारितपाठ्यपुस्तकं प्रमुखं साधनं भवति । तत्र ज्ञानार्जनस्य विविधस्रोतसां प्रवाहोऽपि आवश्यकः ।

शिक्षायतनस्य दैनिककार्यक्रमे कार्यपद्धतौ च परिवर्त्तनं करणीयम् । दैनिककार्यधारायाः परिवर्त्तनम् अपेक्ष्यते । वार्षिककार्यक्रमाणां निर्धारणेन साकं पाठ्यक्रमस्य नियतकालशिक्षणस्य चापि समन्वयः भवेत् । शिक्षणस्य मूल्यायनं यथाविधि भवेत्, येन विद्यालयजीवने छात्राणां पाठ्यचर्चां प्रति रुचिः स्यात् । छात्राणां चिन्तनस्य प्रयोगस्य कार्यानुभवगतिविधीनां च अवसरप्रदानाय प्रचेष्टा कृता । पाठ्यपुस्तकलेखक-संपादकानां, पाठ्यक्रम निर्धारणसमितेः सदस्यानां च कृते हार्दिकीं कृतज्ञतां ज्ञापयामि ।

राष्ट्रियमाध्यमिकशिक्षानुकूलं पाठ्यपुस्तकविकाशक्रमे प्रयत्नशीला इयं परिषद् विशेषज्ञानाम् अध्यापकानां च सत्परामर्शानां स्वागतं विधास्यति । इति ।

**सभापतिः**
माध्यमिक-शिक्षा-परिषद्, ओडिशा,
कटकम्

# शिक्षकान् प्रति

प्रेयांसि मित्राणि ! सादरं वन्दनानि । इदानीन्तनकाले संस्कृतभाषा पुनः क्लिष्टा नास्ति, मृता नास्ति कस्यचिदेकस्य संप्रदायस्य नास्ति अपितु जनसामान्यानां भाषा भवति । अनेकेषु क्षेत्रेषु इयं भाषा मातृभाषारूपेण जनैः स्वीकृता । विद्यार्थिनां मध्ये संस्कृतस्य प्रचारः, अध्यापनं प्रति आग्रहसृष्टिः, आध्यात्मिकी भावना अपि च राष्ट्रं प्रति तेषां श्रद्धाजागरणम् एतेषु विषयेषु भवादृशां विदुषां गुरुदायित्वमस्ति । पुस्तकमिदं भवतां सहायकमात्रम् । तथापि भवताम् आदर्शपाठ्यदानकर्मणि उत्साहवर्धनाय अभिनवपद्धत्या इयं संस्कृतवल्लरी प्रस्तुता ।

विषयमाध्यमेन नैतिकशिक्षा, परिवेशशिक्षा, सांस्कृतिकभावना, राष्ट्रियभावना तथा च भाषायाः सरलप्रयोगः पुस्तकेऽस्मिन् विद्यते । पुस्तकस्थाः विषयाः सूचनात्मकाः भवन्ति । भवन्तः अभ्यासबलेन छात्राणां बुद्धेःविकाशं विधास्यन्ति । संस्कृतस्य पाठनाय इयं संस्कृतवल्लरी अवश्यं भवतां सहचरी भविष्यतीति विश्वासः ।

भवताम्

**लेखकमण्डली**

# सूचीपत्रम्


| | विषयाः | पृष्ठाङ्कः |
|---|---|---|
| | **गद्यभागः** | |
| 1. | भारतवन्दनगीतिका | 1 |
| 2. | सिंहशशककथा | 2 |
| 3. | सत्यम् | 7 |
| 4. | आत्मगुणविकासनम् | 13 |
| 5. | उत्कलगौरवम् | 15 |
| 6. | समयानुवर्त्तिता | 24 |
| 7. | मूढः सहायकः | 29 |
| | **सम्भाषणभागः** | |
| 8. | सम्भाषणम् (प्रथमम्) | 35 |
| 9. | सम्भाषणम् (द्वितीयम्) | 36 |
| 10. | समयः | 37 |
| 11. | सम्भाषणम् (तृतीयम्) | 46 |
| **पद्यभागः** | | |
| 12. | नीतिवाणी | 47 |
| 13. | प्रहेलिकाः | 52 |
| 14. | समयगीतिका | 56 |
| 15. | वसुमती | 59 |
| **अनुच्छेदभागः** | | |
| 16. | प्रथमः अनुच्छेदः | 61 |
| 17. | द्वितीयः अनुच्छेदः | 62 |
| 18. | तृतीयः अनुच्छेदः | 63 |
| 19. | चतुर्थः अनुच्छेदः | 64 |
| 20. | पञ्चमः अनुच्छेदः | 65 |
| 21. | षष्ठः अनुच्छेदः | 66 |
| 22. | सप्तमः अनुच्छेदः | 67 |
| 23. | अष्टमः अनुच्छेदः | 68 |
| 24. | नवमः अनुच्छेदः | 69 |
| 25. | दशमः अनुच्छेदः | 70 |
| 26. | चित्रविभागः | 71 |

# भारतवन्दनगीतिका

**पण्डितभूपतिभूषणमिश्रः**

नौमि धर्मपालितं
सार्वभौमभारतं
मातृभूमि-मानधातृ-नेतृवृन्द-वन्दितम् ।। ध्रुवम् ।।

गाङ्गवारिपावितं साङ्गवेदनादितं
लोकतन्त्रशासितं सत्यमन्त्रमन्त्रितं
शान्तिपुष्पवासितं
त्यागभावभासितं
जाति-धर्म-सम्प्रदाय-भेदभाव-वर्जितम् ।।

अद्रिराजराजितं यज्ञधूमपावितं
ज्ञानदीपभासितं राज्यमाल्यभूषितं
विन्ध्यमेखलायितं
सिन्धुवारिवेष्टितं
व्यास-भास-कालिदास-कीर्तिसौधमण्डितम् ।।

सर्वधर्मराजितं साम्यवादचालितं
मुक्तिसूर्यभासितं कुञ्जपुञ्जरञ्जितं
पुण्यधामशोभितं
तीर्थराजिराजितं
ख्रीष्ट-जैन-बौद्ध-हिन्दु-यावनैरुपासितम् ।।

दैवसम्पदन्वितं शूरशौर्यवन्दितं
सामदानलालितं प्रेमच्छत्रच्छादितं
दिव्यकान्तिशोभितं
भव्यभावभासितं
गान्धि-शास्त्रि-गोपबन्धु-लोकमान्य-मानितम् ।।

●●●

# सिंहशशक-कथा

(विषयोऽयं पञ्चतन्त्रम् इति आख्यायिकाग्रन्थात् आनीतः । एषा आख्यायिका पण्डितविष्णुशर्मणा सुखेन बालानां नीतिशिक्षार्थं विरचिता । पशुपक्षिणां चरित्रमाधारीकृत्य नीत्युपदेशपूर्णाः कथाः अत्र उपलभ्यन्ते । प्रकृतपक्षे पञ्चतन्त्रमेव बालानां सर्वोत्तमः शिक्षणीयः ग्रन्थः । प्रदत्तसिंहशशककथायां बुद्धिबलेन कथम् अत्याचारिणः विनाशः सम्भवेत् तदेव प्रतिपादितम् । मूलकथायाः संक्षेपणम् अत्र विहितम् ।)

कस्मिंश्चिद् वने भासुरको नाम सिंहः प्रतिवसति स्म । अथासौ नित्यमेवानेकमृगशशकादीन् व्यापादयति । अथान्येद्युः तद्वनजाः सर्वे वराहादयो मिलित्वा तमभ्युपेत्य प्रोचुः, ''स्वामिन् ! किमनेन सकलमृगवधेन नित्यमेव, यतस्तव एकेनाऽपि मृगेण तृप्तिर्भवति । अद्य प्रभृति तवात्रोपविष्टस्य जातिक्रमेण प्रतिदिनमेको मृगो भक्षणार्थं समेष्यति । एवं कृते तव तावत् प्राणयात्रा क्लेशं विना भविष्यति, अस्माकं च पुनः सर्वोच्छेदनं न स्यात् ।''

अथ तेषां वचनमाकर्ण्य भासुरक आह, ''अहो ! सत्यमभिहितं भवद्भिः । परं यदि नित्यमेव नैकः श्वापदः समागमिष्यति, तन्नूनं सर्वानपि भक्षयिष्यामि ।'' अथ ते तथैव प्रतिज्ञाय तत्रैव वने निर्भयाः पर्यटन्ति । एकश्च प्रतिदिनं क्रमेण याति ।

अथ कदाचित् जातिक्रमात् शशकस्य वारः समायातः । स समस्तमृगैः प्रेरितोऽनिच्छन्नपि मन्दं मन्दं गत्वा सिंहस्य वधोपायं चिन्तयन् वेलातिक्रमं कृत्वा व्याकुलितहृदयो यावत् गच्छति, तावन् मार्गे कूपमेकं दृष्टवान् । यावत् स कूपोपरि याति, तावत् कूपमध्ये आत्मनः प्रतिबिम्बं ददर्श । दृष्ट्वा च तेन चिन्तितम्, ''यत् भव्य उपायोऽस्ति । अहं भासुरकं प्रकोप्य स्वबुद्ध्यास्मिन् कूपे पातयिष्यामि ।''

अथासौ दिनशेषे भासुरकसमीपं प्राप्तः । सिंहोऽपि वेलातिक्रमेण क्षुत्क्षामकण्ठः कोपाविष्टः व्यचिन्तयत्- ''अहो, प्रातराहाराय निःसत्त्वं वनं मया कर्त्तव्यम् ।'' एवं चिन्तयतस्तस्य शशको मन्दं मन्दं गत्वा प्रणम्य तस्याग्रे स्थितः । अथ तं प्रज्वलितात्मा भासुरको भर्त्सयमान आह, ''रे शशकाधम ! एकस्तावत् त्वं लघुः, अपरतो वेलातिक्रमेण प्राप्तः । तस्मादपराधात् त्वां निपात्य प्रातः सकलान्यपि मृगकुलानि उच्छेदयिष्यामि ।''

एतच्छ्रुत्वा शशकः सविनयं प्रोवाच- ''स्वामिन् ! नापराधो मम न च सत्त्वानाम् । तच्छ्रूयतां कारणम् ।'' सिंह आह, ''सत्वरं निवेदय यावन् मम दंष्ट्रान्तर्गतो न भविष्यसि ।'' शशक आह, ''स्वामिन् ! समस्तमृगैरद्य जातिक्रमेण मम लघुतरस्य प्रस्तावं विज्ञाय चतुर्भिः शशकैः सहाहं प्रेषितः । ततोऽहमागच्छन् मार्गे महता केनचिदपरेण सिंहेन गह्वरात् निर्गत्याभिहितः, 'रे क्व प्रस्थिता यूयम् ? अभीष्टदेवतां स्मरत ।''

ततो मयाभिहितम्, ''वयं स्वामिनो भासुरकसिंहस्य सकाशमाहारार्थं गच्छाम: ।'' ततस्तेनाभिहितम्, ''यद्येवं तर्हि मदीयमेतद् वनम् । मया सह समस्तैरपि श्वापदैर्वर्तितव्यम् । चौररूपी स भासुरक: । अथ यदि सोऽत्र राजा ततो विश्वासस्थाने चतुर: शशकानत्र संस्थाप्य तमाहूय द्रुमागच्छ । य: कश्चिद् आवयोर्मध्यात् पराक्रमेण राजा भविष्यति ।'' ततोऽहं तेनादिष्ट: स्वामिसकाशमभ्यागत: । एतद् वेलातिक्रमकारणम् । तदत्र स्वामी प्रमाणम् ।''

तच्छ्रुत्वा भासुरक आह, ''भद्र ! यद्येवं तत् सत्वरं दर्शय मे तं चौरसिंहं येनाहं मृगकोपं तस्योपरि क्षिप्त्वा स्वस्थो भवामि ।'' शशक आह, ''स्वामिन् ! परं भवत: शत्रु: दुर्गाश्रय: । ततो दुर्गस्थो दु:साध्यो भवति रिपु: ।'' भासुरक आह, ''भद्र ! दुर्गस्थमपि दर्शय तं चौरसिंहं येन व्यापादयिष्यामि ।''

अथ शशक आह, ''यद्येवं तदागच्छतु स्वामी ।'' एवमुक्त्वाग्रे चलित: । ततश्च पूर्वदृष्टकूपमासाद्य स भासुरकमाह, ''स्वामिन् ! कस्ते प्रतापं सोढुं समर्थ: ? त्वां दृष्ट्वा दूरतोऽपि स चौरसिंह: प्रविष्ट: स्वं दुर्गम् । तदागच्छतु, येन दर्शयामि ।''

भासुरक आह, ''अरे दर्शय मे तद् दुर्गम् ।'' तदनु शशकेन दर्शित: कूप: । तत: सोऽपि मूर्ख: सिंह: कूपमध्ये आत्मप्रतिबिम्बं जलमध्यगतं दृष्ट्वा सिंहनादमकरोत् । तत: प्रतिशब्देन कूपमध्यात् द्विगुणतरो नाद: समुत्थित: । अथ तेन तं शत्रुं मत्वात्मानं तस्योपरि प्रक्षिप्य प्राणा: परित्यक्ता: । शशकोऽपि हृष्टमना: सर्वमृगानानन्द्य तै: सह यथासुखं तत्र वने न्यवसत् ।

## टिप्पणी

अन्येद्यु: - ଅନ୍ୟ ଏକ ଦିନେ (अन्यस्मिन् दिवसे) । सर्वोच्छेदनम् - ସମସ୍ତଙ୍କ ବିନାଶ (सर्वेषां विनाश:) । आकर्ण्य - ଶୁଣି (श्रुत्वा) । श्वापद: - ହିଂସ୍ରଜନ୍ତୁ (शुन: पदानि इव पदानि यस्य) । पर्यटन्ति - ପର୍ଯ୍ୟଟନ କରନ୍ତି (पर्यटनं कुर्वन्ति) । क्षुत्क्षामकण्ठ: - କ୍ଷୁଧାତୁରକଣ୍ଠ (क्षुधा क्षाम: कण्ठ: यस्य) । प्रज्वलितात्मा - ଅତି କ୍ରୋଧଯୁକ୍ତ (नितरां कोधपरवश:) । निपात्य- ହତ୍ୟାକରି (हत्वा) । सत्त्वानाम् - ପ୍ରାଣୀମାନଙ୍କର (प्राणिनाम्) । संस्थाप्य - ରଖି (संस्थापनं कृत्वा) । एवमुक्त्वा - ଏହିପରି କହି (एवं कथयित्वा) । भर्त्सयमान: - ଗାଳିଦେଇ (भर्त्सनां कुर्वन्) । दुर्गाश्रय: - ଦୁର୍ଗରେ ରହିଥିବା (दुर्गम् आश्रय: यस्य) । प्रतिशब्देन - ପ୍ରତିଧ୍ୱନି ଦ୍ୱାରା (प्रतिध्वनिना) । प्राणयात्रा - ଜୀବନଯାତ୍ରା (जीवननिर्वाह:) ।

## अभ्यासः

**1. निजभाषया वाक्यद्वयेन वाक्यत्रयेण वा उत्तरं लिखत ।**

(क) भासुरक: कथं मृत: ?

(ख) क्रुद्ध: सिंह: शशकं किमवदत् ?

(ग) वन्यजन्तव: भासुरकाय कीदृशं प्रस्तावं दत्तवन्त: ?

(घ) शशक: विलम्बस्य कारणं किमवदत् ?

(ङ) पशूनां प्रस्तावं श्रुत्वा भासुरक: किमाह ?

**2. निजभाषया एकपदात्मकं/अतिसंक्षिप्तमुत्तरं लिखत ।**

(क) भासुरक: नित्यं कान् व्यापादयति ?

(ख) जातिक्रमेण कदाचित् कस्य वार: आगत: ?

(ग) शशक: कूपमध्ये किमपश्यत् ?

(घ) कीदृश: रिपु: दु:साध्य: ?

(ङ) प्रतिशब्देन कूपात् क: समुत्थित: ?

(च) भासुरक: कथं स्वस्थो भविष्यति ?

(छ) मार्गे गच्छन्तं शशकं अपर: सिंह: दृष्ट्वा किमुवाच ?

(ज) शशक: समस्तमृगै: प्रेरित: किमकरोत् ?

(झ) कूपे स्वप्रतिविम्बं दृष्ट्वा शशक: किमचिन्तयत् ?

(ट) प्रतिदिनं कति श्वापदा: भासुरकसमीपं यान्ति ?

**3. सन्धिविच्छेदं कुरुत ।**

यतस्तव, कस्ते, तदनु, शशकानत्र, प्रातराहाराय, यद्येवम्, तदागच्छतु, साध्यो भवति, दुर्गस्थमपि सिंहनादमकरोत् ।

**4.** **सन्धिं कुरुत ।**

तृप्तिः + भवति, न + एकः, तस्य + अग्रे, सकलानि + अपि, सः + अहम्, सर्वाम् + एकाम्, तस्य + उपरि, मत्वा + आत्मानम्, सर्व + उच्छेदनम्, कः + चित् ।

**5.** **रेखाङ्कितपदानां विभक्तिनाम लिखत ।**

(क) ते वने निर्भयाः पर्यटन्ति ।

(ख) त्वं वेलातिक्रमेण प्राप्तः ।

(ग) समस्तैः श्वापदैः वर्त्तितव्यम् ।

(घ) दुःसाध्यो भवति रिपुः ।

(ङ) कूपमध्यात् द्विगुणतरो नादः समुत्थितः ।

**6.** **रेखाङ्कितपदानां विभक्तिकारणं लिखत ।**

(क) स्वामिन् ! भवतः शत्रुः दुर्गाश्रयः ।

(ख) अथ शशकः आह ।

(ग) निःसत्त्वं वनं मया कर्त्तव्यम् ।

(घ) मया सह वर्त्तितव्यम् ।

(ङ) अभीष्टदेवतां स्मरत ।

**7.** **वाक्यानि रचयत ।**

उपरि, विना, क्रमेण, सविनयम्, सह, यथासुखम्, एवम्, स्मरत, तत्र, कर्त्तव्यम् ।

**8.** **शुद्धम् उत्तरं निरूपयत ।**

(क) सिंहस्य नाम किमासीत् ?

(i) भस्मासुरः (ii) क्षुद्रबुद्धिः

(iii) भासुरकः (iv) चण्डरवः

(ख) रिपु: कदा दु:साध्यो भवति ?

(i) गृहस्थ: (ii) दुर्गस्थ:

(iii) ग्रामस्थ: (iv) गर्भस्थ:

(ग) मूर्ख: सिंह: कूपमध्ये आत्मन: प्रतिबिम्बं जलमध्यगतं दृष्ट्वा किमकरोत् ?

(i) शङ्खनादम् (ii) ब्रह्मनादम्

(iii) सिंहनादम् (iv) धरानादम्

(घ) कदाचित् जातिक्रमात् कस्य वार: समायात: ?

(i) मृगस्य (ii) गजस्य

(iii) शशकस्य (iv) अश्वस्य

(ङ) केन पञ्चतन्त्रं विरचितम् ?

(i) विष्णुशर्मणा (ii) कालिदासेन

(iii) नारायणेन (iv) नारदेन

**9. शून्यस्थानानि पूरयत । (कोष्ठकात्)**

(क) प्राणयात्रा ______________ विना भविष्यति ।

(ख) कूपमध्ये ______________ प्रतिविम्बं ददर्श ।

(ग) शशक: ______________ प्रोवाच ।

(घ) मृगकोपं ______________ उपरि क्षिप्त्वा स्वस्थो भवामि ।

(ङ) स चौरसिंह: प्रविष्ट: स्वं ______________ ।

| सविनयं, दुर्गम्, क्लेशं, तस्य, आत्मन: |
|---|

●●●

# सत्यम्

*विद्वन्मणिः डॉ. केशवचन्द्रदाशः इदानीन्तनयुगे संस्कृतसाहित्यिकेषु अग्रगण्यः भवति । तेन अनेकानि पुस्तकानि विरचितानि । तस्य पुस्तकेषु 'एकदा' इति लघुकथासंग्रहः ग्रन्थः अन्यतमः । अयं विषयः तस्मात् कथाग्रन्थान् उद्धृतः ।*

अन्येद्युः पितामही अलिन्दे उपविश्य जपमग्ना अस्ति । पुलोमजा उपधाननिकटे उपविश्य तस्याः मुखं पश्यति । माधवः किञ्चित् विरक्तो भूत्वा अवदत्- पितामहि ! कथं न समापयसि ? अद्य किं कथां न श्रावयिष्यसि ? पितामही पूर्ववत् शनैरुपविशति । कण्ठं परिष्करोति । जृम्भामुखेन आरभते - एकदा...............................

एकदा एकस्मिन् ग्रामोपान्ते एका पुष्करिणी आसीत् । तत्र ग्रामस्य जनाः स्नानं कुर्वन्ति । वसनं क्षालयन्ति । तत्रैव ते शौचकर्म कुर्वन्ति । तस्मादपि जलमानीय पिबन्ति पाकादिकर्म च कुर्वन्ति । तत्रैव गोमेषच्छागादीनां स्नानमपि कारयन्ति । पुष्करिणीं परितः नानावृक्षाः सन्ति । केचन वृक्षाः तटसंलग्नाश्च वर्त्तन्ते । पुष्करिण्याः अपरभागे एकः आश्रमः अस्ति । तत्र एको मुनिः निवसति । सोऽपि तर्पणादिकं कर्म तत्र करोति । किन्तु सदा असन्तुष्टो भवति । सः जनान् अनुनयति । वारं वारमपि उपदिशति । परं न कोऽपि तस्य वचनं शृणोति ।

मुनिः एकदा चिन्तामग्नः - केन प्रकारेण एतान् जनान् बोधयिष्यामि । पुष्करिणीतः पङ्कोद्धारः न भवति । प्रतिदिनं च जलं प्रदूषितं भवति । प्रदूषितं जलं पीत्वा जनाः अपि रुग्णाः भवन्ति । कथम् इमे वारणीयाः.... ।

सहसा कोलाहलः श्रुतः । मुनिः वहिरागत्य अपश्यत् । केचन जनाः एकं बालकं ताडयन्ति । तं च भर्त्सयन्ते । बालकः भयेन कम्पते क्रन्दति च । मुनिः तत्र आगच्छत् । जनान् वारयित्वा अपृच्छत् - किमभवत् ? किमर्थं भवन्तः एनं ताडयन्ति ? जनाः अवदन् - एषः मिथ्यावादी । सदैव मिथ्याभाषणं करोति । वृथा सर्वान् प्रतारयति । सद्यः अस्मान् प्रतारितवान् । मुनिः बालकमपृच्छत् - अरे सत्यं न वदसि ? बालकः कम्पितकण्ठेन अवदत् - सत्यं किम् ? मुनिः तम् आश्वासितवान् - न जानासि ? तर्हि मया सह आगच्छ । एवमुक्त्वा तं करे धृत्वा मुनिः आश्रमं प्रति बालकमानयत् ।

मुनिः अचिन्तयत् - अयमेव समुचितः समयः । अस्मिन्नवसरे ग्राम्यजनाः अवश्यं शिक्षयितव्याः । ततः मुनिः बालकमपृच्छत्-

- किं तव नाम ?

- नाम्नाहं कृष्णः ।

- भवतु, केन प्रकारेण मिथ्या कथयसि ?

- यथेच्छं वदामि ।

- तर्हि इमां पुष्करिणीं विलोक्य किमपि कथय।

बालकः कृष्णः प्रसन्नः सञ्जातः । सहर्षं च अवदत् – जलेऽस्मिन् एको महान् मत्स्यः अस्ति । भो जनाः ! आगच्छत आगच्छत पश्यत, कीदृशं सः खेलति ? मुनिरवदत् - साधु साधु । सम्यक् चिन्तितम् । तर्हि श्वः प्रभाते ग्राम्यजनान् एतावत् कथय । कृष्णः किञ्चित् कुण्ठितोऽभवत् ।

- नहि, ते मां ताडयिष्यन्ति ।

- अरे नहि......... ।

- अनन्तरं मामेव साक्षिणं करिष्यसि ।

अपरप्रभाते कृष्णः ग्रामस्य प्रतिभागं जनान् अवदत् - पुष्करिण्याम् एको महान् मत्स्यो मया दृष्टः । केचन अवदन् - अरे त्वं मिथ्यावादी । तव वचने को विश्वासः । तत्क्षणं कृष्णः उक्तवान् - तदानीं मया सह मुनिः आसीत् । सोऽपि दृष्टवान् । आगच्छ......तत्र पृच्छ.... ।

मुनिं साक्षिरूपेण स्वीकृत्य ग्राम्यजनाः अपरदिने मत्स्यान्वेषणमकुर्वन् । अन्ततः सर्वे मिलित्वा पुष्करिण्यां प्राविशन् मत्स्यान् च अमारयन् । किन्तु महामत्स्यस्य सन्धानं न प्राप्तम् । सकलं दिवसं ते अन्विष्टवन्तः । सायंकाले नितरां विरक्ताः अभवन् । मुनिमुपगम्य सरोषमवदन् - किं भवानपि अस्मान् प्रतारयति ? मुनिः धीरमवदत् - अरे महामत्स्यः किं सरलतया धर्तुं शक्येत । तदर्थं श्रमः करणीयः । श्वः प्रातः बन्धच्छेदं कृत्वा जलं निष्कासयत । तदनु पङ्कोद्धारं कुरुत । ततः महामत्स्यः मिलिष्यति ।

तद्रात्रौ ग्राम्यजनानां नेत्रे निद्रा नास्ति । ते प्रातरागम्य प्रथमतः तटवर्त्तिवृक्षाणां छेदनमकुर्वन् । तदनु बन्धच्छेदं कृत्वा जलं च निष्कासितवन्तः । एवं प्रकारेण कति दिनानि व्यतीतानि । ततः पङ्कोद्धारं कृत्वा पुष्करिणीं गभीरीं कृतवन्तः । पङ्कं च आनीय शस्यक्षेत्रेषु प्रसारितवन्तः । इत्थं निदाघकालः उपगतः । सहसा वृष्टिरभवत् । पुष्करिणी जलपूर्णा सञ्जाता । निर्मलं जलं दृष्ट्वा सर्वे प्रसन्नाः अभवन् । तटानां परिष्करणेन सर्वत्र सौविध्यमनुभूतम् । एवमवलोक्य केचन ग्राममुख्याः अवदन् - इतः परं यदि कश्चित् जलं दूषयिष्यति सः दण्डनीयो भविष्यति ।

एकदा मुनिः कृष्णं दृष्ट्वा आकारितवान् । तम् आश्रममानीय अपृच्छत् - अरे कृष्ण । सत्यं किं ज्ञातं वा ?

- न ज्ञातम् ।

- अरे ! सत्यकथनेन केवलं सत्यं न भवति ।

यत् कल्याणकरं वचनं तदपि सत्यम् । पितामही पुलोमजामबोधयत् - अस्माकं शास्त्रे वर्त्तते-

**सत्यं हि वचनं श्रेयः सत्यादपि हितं भवेत् ।**

**यद्भूतं हितमत्यन्तमेतत् सत्यं मतं मम ।**

## टिप्पणी

अन्येद्यु: - ଅନ୍ୟ ଏକ ଦିନେ (अन्यस्मिन् दिने) । पितामही - ଜେଜେମା (पितु: माता) । अलिन्दे - ବାରଣ୍ଡାରେ (द्वारप्रकोष्ठे) । जपमग्ना - ଜପମଗ୍ନ (जपे मग्ना) । समापयसि - ଶେଷ କରୁଛ (समाप्तं करोषि) । श्रावयिष्यसि- ଶୁଣାଇବ (श्रवणं कारयिष्यसि) । उपविशति - ବସୁଛି (उपवेशनं करोति) । आरभते - ଆରମ୍ଭ କରେ (आरम्भं करोति) । पुष्करिणी - ପୋଖରୀ (सरोवर:) । वसनम् - ଲୁଗା (वस्त्रम्) । क्षालयन्ति - ଧୁଅନ୍ତି (क्षालनं कुर्वन्ति ।) तत्रैव - ସେଠାରେ ହିଁ (तस्मिन् स्थाने एव) । कारयन्ति - କରାନ୍ତି (कर्त्तुं प्रेरयन्ति) । परित: - ଚାରିପାଖରେ (चतु:पार्श्वे) । केचन - କେତେକ (कतिपया:) । जनान् - ଲୋକଙ୍କୁ (लोकान्) । ताडयन्ति - ମାଡ଼ଦିଅନ୍ତି (दण्डयन्ति) । भर्त्सयन्ति - ଗାଳିଦିଅନ୍ତି (तिरस्कुर्वन्ति) । वारयित्वा - ବାରଣକରି (वारणं कृत्वा) । मिथ्यावादी - ମିଛୁଆ (मिथ्या वदति य:) । प्रतारितवान् - ଠକିଛି (प्रतारणां कृतवान्) । कम्पितकण्ठेन - କଣ୍ଠଥରାଇ (सगद्गदम्) । विलोक्य - ଦେଖି (दृष्ट्वा) । सहर्षम् - ଆନନ୍ଦରେ (सानन्दम्) । सम्यक् - ଭଲ (उत्तमम्) । उपगम्य - ପାଖକୁଯାଇ (समीपं गत्वा) । निष्कासितवन्त: - ବାହାରକଲେ (निष्कासनम् अकुर्वन्) । इत्थम् - ଏହିପରି (एवं प्रकारेण) । आकारितवान् - ଡାକିଲେ (आहूतवान्) । श्रेय: - କଲ୍ୟାଣକର (कल्याणकरम्) ।

## अभ्यास:

**1. निजभाषया वाक्यद्वयेन वाक्यत्रयेण वा उत्तरं लिखत ।**

(क) अस्माकं शास्त्रे किं वर्त्तते ?

(ख) किं सत्यम् ?

(ग) महामत्स्यं प्राप्तुं ग्राम्यजना: किम् अकुर्वन् ?

(घ) पुष्करिण्यां ग्रामजना: किं कुर्वन्ति ?

(ङ) मुनि: कथम् असन्तुष्ट: भवति ?

**2. निजभाषया एकपदात्मकं/अतिसंक्षिप्तम् उत्तरं लिखत ।**

(क) किं पीत्वा जना: रुग्णा: भवन्ति ?

(ख) केचन जना: कं ताडयन्ति ?

(ग) कः भयेन कम्पते ?

(घ) कम्पितकण्ठेन बालकः किमवदत् ?

(ङ) बालकं करे धृत्वा मुनिः कुत्र अनयत् ?

(च) बालकः स्वनाम किमिति अवदत् ?

(छ) पुष्करिण्यां कः खेलति इति बालकः अवदत् ?

(ज) कं साक्षिरूपेण स्वीकृत्य ग्राम्यजनाः मत्स्यान्वेषणम् अकुर्वन् ?

(झ) जनैः कस्य सन्धानं न प्राप्तम् ?

(ञ) कदा ग्राम्यजनानां नेत्रे निद्रा नासीत् ?

**3. सन्धिविच्छेदं कुरुत ।**

सत्यादपि, तदपि, आश्रममानीय, कश्चित्, सौविध्यमनुभूतम्, तदनु, वृष्टिरभवत्, प्रातरागम्य, भवानपि, धीरमवदत् ।

**4. सन्धिं कुरुत ।**

किम् + चित्, शनैः + उपविशति, परि + करोति, तस्मात् + अपि, जलम् + आनीय, सः + अपि, वारम् + अपि, वहिः + आगत्य, किम् + अभवत्, सदा + एव ।

**5. रेखाङ्कितपदानां विभक्तिनाम लिखत ।**

(क) पुलोमजा तस्याः मुखं पश्यति ।

(ख) पितामही पूर्ववत् उपविशति ।

(ग) ग्रामस्य जनाः स्नानं कुर्वन्ति ।

(घ) स जनान् अनुनयति ।

(ङ) कथम् इमे वारणीयाः ?

**6. रेखाङ्कितपदानां विभक्तिकारणं लिखत ।**

(क) जना: बालकं ताडयन्ति ।

(ख) बालक: भयेन कम्पते ।

(ग) सद्य: अस्मान् प्रतारितवान् ।

(घ) मया सह आगच्छ ।

(ङ) पुष्करिणीं विलोक्य किमपि कथय ।

**7. वाक्यानि रचयत ।**

भयेन, सह, अनु, किम्, एव, यथेच्छम्, वहि:, परित:, निकटे

**8. शुद्धम् उत्तरं निरूपयत ।**

(क) पितामही कुत्र उपविश्य जपमग्ना अस्ति ?

(i) अलिन्दे (ii) पाकशालायाम्

(iii) शयनकक्षे (iv) उद्याने

(ख) ग्रामस्य जना: कुत्र स्नानं कुर्वन्ति ?

(i) नद्यां (ii) सागरे

(iii) पुष्करिण्यां (iv) नलकूपे

(ग) प्रदूषितं जलं पीत्वा के रुग्णा: भवन्ति ?

(i) पशव: (ii) विहगा:

(iii) जना: (iv) खगा:

(घ) बालक: कथं कम्पते क्रन्दति च ?

(i) आनन्देन (ii) भयेन

(iii) दु:खेन (iv) क्रोधेन

(ङ) एकदा मुनिः कं दृष्ट्वा आकारितवान् ?

(i) रामं (ii) कृष्णं

(iii) रामकृष्णं (iv) गोपालम्

**9. शून्यस्थानं पूरयत । (कोष्ठकात्)**

(क) _____________ महामत्स्यः मिलिष्यति ।

(ख) ग्राम्यजनानां नेत्रे _____________ नास्ति ।

(ग) किं तव _____________ ?

(घ) अयमेव _____________ समयः ।

(ङ) केन प्रकारेण _____________ कथयसि ?

| |
|---|
| नाम, मिथ्या, निद्रा, समुचितः, ततः |

●●●

# आत्मगुणविकासनम्

*विद्यार्थिनः अध्ययनेन साकम् आत्मनः गुणानां विकाशं कुर्युः । अन्यथा उत्तरकाले ते सुनागरिकाः न भवेयुः । एतदर्थं डॉ. निरञ्जनदाशेन विरचितोऽयं विषयः पुस्तकेऽस्मिन् सन्निवेशितः । कथ्यते ''गुणाः सर्वत्र पूज्यन्ते पितृवंशः निरर्थकः'' इति ।*

एकदा सर्वेऽपि प्राणिनः अन्ये जीवविशेषाश्च सृष्टिकर्त्तुः ब्रह्मणः समीपं गत्वा तम् उक्तवन्तः - ''भोः पितामह ! अस्माकम् अभियोगं शृणोतु भवान्'' इति ।

ब्रह्मा उक्तवान् - ''भवन्तः एकैकशः आगत्य निवेदयन्तु'' इति ।

आदौ गर्दभः उक्तवान् - ''हे प्रभो ! भवतः सृष्टौ पक्षपातः दृश्यते । यतः अत्र जीवानां मध्ये खाद्यखादकभावः अस्ति । अन्यच्च तेषु केचन बुद्धिमन्तः, अन्ये केचन मन्दाः इति जनाः मन्यन्ते । शृगालः बुद्धिमान् इति प्रथा अस्ति । जनाः मां बुद्धिहीनं मन्यन्ते । ते भारवहनकार्ये मां नियोजयन्ति । भवान् मां चतुरं करोतु । मम गुणान् शृगालाय ददातु'' इति ।

ततः काकः उक्तवान् - ''अहं जनानां सेवां करोमि । 'का का' कृत्वा रात्रिः समाप्ता इति जनान् प्रबोधयामि । परं मया उपकृताः अपि जनाः मद्विषये जुगुप्सन्ते, कोकिलमेव प्रशंसन्ति च । कोकिलस्य सुमधुरः स्वरः मम तु कर्कशः । अतः भवान् मम कण्ठं मधुरं, कोकिलस्य च कर्कशं करोतु'' इति ।

कुक्कुरः उक्तवान् - ''प्रभो ! मां निकृष्टजीविनं मन्यन्ते जनाः । उच्छिष्ट-अमेध्य-भक्षणेन माम् अस्पृश्यम् अपि मन्यन्ते ते । परम् उच्छिष्टं खादन् अपि मार्जारः तैः न तिरस्क्रियते । अतः मां मार्जारं करोतु'' इति ।

ततः मण्डूकः अवदत् - ''भगवन् ! सर्वे प्राणिनः ममोपरि निर्दयम् अत्याचारं कुर्वन्ति । सर्पः विनायासं मां खादति । ततः पलायितुमपि मह्यं शक्तिः न दत्ता भवता । विज्ञानच्छात्राः अपि मां छिन्दन्ति । अतः मां बृहत्कायं करोतु'' इति ।

तत्पश्चात् विषवृक्षः अवदत् - ''मम सर्वावयवे विषं भवति । अतः मां जातमात्रं दृष्ट्वा जनाः समूलम् उत्पाटयन्ति । तुलसीं तु सर्वे पूजयन्ति । अतः मा तुलसीं करोतु'' इति ।

एवं सर्वेऽपि परगुणानां प्रशंसा कुर्वन्तः स्वगुणविषये अतृप्तिम् असहिष्णुतां च प्राकटयन् । तत् श्रुत्वा ब्रह्मा उक्तवान्- भवताम् अपेक्षां पूरयितुमहम् असमर्थः । सर्वे विष्णोः समीपं गच्छाम'' इति ।

ततः सर्वेऽपि भगवतः विष्णोः समीपं गतवन्तः; स्वकीयम् अभियोगं श्रावितवन्तश्च । सकलं वृत्तान्तं

श्रुत्वा भगवान् विष्णुः उक्तवान् - ''प्रकृतेः नियमानुसारमेव भवन्तः सर्वे सृष्टाः । तदनुसारमेव तिष्ठन्तु'' इति ।

सर्वे एकस्वरेण अवदन् - ''यदि वयं यथा इच्छामः तथा परिवर्तनं न करिष्यति तर्हि भूलोकं न गमिष्यामः एव'' इति ।

एतत् औद्धत्यपूर्णं वचनं श्रुत्वा विष्णुः- ''अस्तु, भवन्तः यथा इच्छन्ति तथा करिष्यामि । इदानीं गच्छन्तु'' इति उक्तवान् । सन्तुष्टाः ते सर्वे अपि भूलोकमागतवन्तः ।

ततः भूलोकवासिनः अनुभूतवन्तः यत् काकाः कोकिलाः इव गायन्ति । गर्दभाः शृगालाः इव शब्दायन्ते कुक्कुरेषु मार्जारगुणाः दृश्यन्ते । बृहत्कायान् मण्डूकान् दृष्ट्वा सर्पाः भीत्या पलायन्ते । तुलसीं यः स्पृशति सः कण्डूतिम् अनुभवति । निम्बवृक्षाश्च मधुरायिताः ।

ईदृशं व्यतिक्रमं दृष्ट्वा भूलोकवासिनः विस्मिताः भीताश्च अभवन् । परिवर्तनं सोढुं ते न सज्जाः । ते चिन्तितवन्तः यत् प्रलयकालः एव सन्निहितः इति । ते भगवन्तं प्रार्थितवन्तः – ''भगवन् ! एतस्याः विपदः अस्मान् रक्षतु'' इति । अन्यगुणान् प्रदर्शयतः प्राणिनः वृक्षान् सस्यानि च ते सर्वथा तिरस्कृतवन्तः एव ।

एवं लोकानाम् अनादरपात्रतां गताः विफलमनोरथाः ते सर्वे पुनः विष्णोः समीपं गत्वा निवेदितवन्तः- ''हे भगवन् ! अस्माकमपराधं क्षाम्यतु । अस्मभ्यं पूर्वगुणान् एव ददातु । वयं सृष्टेः नियमं पालयन्तः यथापूर्वं जीवामः'' इति ।

एतत् श्रुत्वा दयालुः विष्णुः उक्तवान्- ''समतारक्षणं सृष्टेः धर्मः । गुणकर्मानुसारमेव भवन्तः सर्वे सृष्टाः । अधुना भूलोकं गच्छन्तु । स्वगुणैः बलीयांसः सन्तः सृष्टिप्रक्रियायां साहाय्यम् आचरन्तु'' इति ।

सर्वेऽपि सन्तुष्टाः सन्तः भूलोकमागताः । सृष्टिप्रक्रियायाम् आत्मानं योजितवन्तश्च ।

## टिप्पणी

एकदा - ଥରେ (एकस्मिन् समये) । उक्तवन्तः - କହିଲେ (अवदन्) । सृष्टौ - ସୃଷ୍ଟିରେ (सृष्टिमध्ये) । मन्दाः - ମୂର୍ଖମାନେ (मूर्खाः) । नियोजयन्ति - ନିୟୋଜିତ କରନ୍ତି (नियोजनं कुर्वन्ति) । निर्दयम् - ନିର୍ଦ୍ଦୟ (निष्ठुरम्) । छिन्दन्ति - କାଟନ୍ତି (कर्त्तनं कुर्वन्ति) । स्वकीयम् - ନିଜର (निजस्वम्) । सकलम् - ସମସ୍ତ (अखिलम्) । अनुभूतवन्तः - ଅନୁଭବକଲେ (अनुभवम् अकुर्वन्) । विस्मिताः - ଆଶ୍ଚର୍ଯ୍ୟ ହେଲେ (चकिताः) । विपदः - ବିପଦରୁ (दुःखात्) । प्राणिनः - ପ୍ରାଣୀମାନେ (जीवाः) । निवेदयन्तु - ଜଣାନ୍ତୁ (निवेदनं कुर्वन्तु) । जीवानाम् - ଜୀବମାନଙ୍କର (प्राणिनाम्) । मन्यन्ते - ମନେ କରନ୍ତି (चिन्तयन्ति) । भगवन् - ମହାଶୟ (महाशय) । विनायासम् - ସହଜରେ (अक्लेशेन) । अवयवे - ଅଙ୍ଗରେ (अङ्गे) । श्रावितवन्तः - ଶୁଣାଇଲେ (अश्रावयन्) । भूलोकम् - ପୃଥିବୀକୁ (पृथिवीम्) । बृहत्कायाम्– ବିଶାଳକାୟ (विशालकायाम्) । सोढुम् - ସହିବାକୁ (सहनं कर्त्तुम्) । क्षाम्यतु - କ୍ଷମା କରନ୍ତୁ (क्षमां करोतु) ।

## अभ्यासः

**1. निजभाषया वाक्यद्वयेन वाक्यत्रयेण वा उत्तरं लिखत ।**

(क) सर्वे प्राणिनः ब्रह्मणः समीपं गत्वा किमुक्तवन्तः ?

(ख) गर्दभः ब्रह्माणं किमुक्तवान् ?

(ग) काकेन ब्रह्मा किमुक्तः ?

(घ) कुक्कुरः ब्रह्मणे केन प्रकारेण स्वदुःखं निवेदितवान् ?

(ङ) विषवृक्षः किमवदत् ?

**2. निजभाषया एकपदात्मकं अतीव संक्षेपेण वा उत्तरं लिखत ।**

(क) सृष्टेः धर्मः कः ?

(ख) किं दृष्ट्वा भूलोकवासिनः विस्मिताः अभवन् ?

(ग) के मधुरायिताः ?

(घ) कां दृष्ट्वा सर्पाः भीत्या पलायन्ते ?

(ङ) गर्दभाः कीदृशं शब्दायन्ते स्म ?

(च) सर्वे प्राणिनः कस्य समीपं गतवन्तः ?

(छ) कां सर्वे पूजयन्ति ?

(ज) विषवृक्षस्य कुत्र विषं भवति ?

(झ) सर्पः विनायासं कं खादति ?

(ञ) जनाः कम् अस्पृश्यं मन्यन्ते ?

**3. सन्धिविच्छेदं कुरुत ।**

सर्वेऽपि, अस्माकमपराधम्, भीताश्च, निम्बवृक्षाश्च, भूलोकमागतवन्तः, सर्वावयवे, पूरयितुमहम्, नियमानुसारमेव ।

**4. सन्धिं कुरुत ।**

एक + एकशः, अन्यत् + च, मत् + विषये, कोकिलम् + एव, मम + उपरि, तत् + पश्चात्, तत् + अनुसारम् + एव, श्रावितवन्तः + च ।

**5. रेखाङ्कितपदानां विभक्तिनाम लिखत ।**

(क) अस्माकम् <u>अभियोगं</u> शृणोतु ।

(ख) भो प्रभो, भवतः <u>सृष्टौ</u> पक्षपातः दृश्यते ।

(ग) जनाः <u>मां</u> बुद्धिहीनं मन्यन्ते ।

(घ) <u>कोकिलस्य</u> सुमधुरः स्वरः ।

(ङ) मां <u>मार्जारं</u> करोतु ।

**6. रेखाङ्कितपदानां विभक्तिकारणं लिखत ।**

(क) <u>मह्यं</u> शक्तिः न दत्ता ।

(ख) <u>विषवृक्षः</u> अवदत् ।

(ग) <u>विष्णोः</u> समीपं गच्छामः ।

(घ) <u>भूलोकवासिनः</u> विस्मिताः अभवन् ।

(ङ) समतारक्षणं <u>सृष्टेः</u> धर्मः ।

**7. वाक्यानि रचयत ।**

अपि, अधुना, उक्तवान्, श्रुत्वा, सोढुम्, अनुभवति, तथा, एतत्, एवम्, समीपम् ।

**8. शुद्धम् उत्तरं निरूपयत ।**

(क) कः बुद्धिमान् इति प्रथा अस्ति ?

(i) शृगालः (ii) काकः

(iii) सिंहः (iv) मार्जारः

(ख) रात्रिः समाप्ता इति कः जनान् प्रबोधयति ?

(i) कपोतः (ii) काकः

(iii) चटकः (iv) खंजनः

(ग) सर्पः विनायासं कं खादति ?

(i) मार्जारम् (ii) मण्डूकम्

(iii) नकुलम् (iv) शशकम्

(घ) कस्य सर्वावयवे विषं भवति ?

(i) विषवृक्षस्य (ii) सर्पस्य

(iii) दुर्जनस्य (iv) गजस्य

(ङ) सृष्टेः धर्मः कः ?

(i) भिन्नतारक्षणम् (ii) ममतारक्षणम्

(iii) समतारक्षणम् (iv) प्रभाप्रदर्शनम्

**9. शून्यस्थानानि पूरयत । (कोष्ठकात्)**

(क) सर्वेऽपि _____________ सन्तः भूलोकमागताः ।

(ख) भवन्तः यथा इच्छन्ति _____________ करिष्यामि ।

(ग) सर्वे _____________ समीपं गतवन्तः ।

(घ) मह्यं _____________ न दत्ता भवता ।

(ङ) भवान् मम _____________ मधुरं करोतु ।

| विष्णोः कण्ठं, सन्तुष्टाः, शक्तिः, तथा |
|---|

# उत्कलगौरवम्

*पण्डितः चन्द्रशेखरपतिः उत्कलभूखण्डे एकं परिचितं नाम । असौ संस्कृतविद्वान् अनेकासां प्रतिभानाम् अधिकारी आसीत् । तेन अनेकानि उपादेयानि पुस्तकानि विरचितानि । प्रबन्धोऽयं तस्य कृतिषु अन्यतमः । छात्रेषु देशभक्तिभावं जागरयितुं विषयेऽस्मिन् प्रयासः कृतः ।*

भारतवर्षे ओडिशाराज्यस्य महत्त्वं सुविदितम् । एतत् राज्यं कृषिप्रधानम् । या कृषकजातिः अस्य भूखण्डस्य मूलाधिवासिनी सा उड्रनाम्नी प्रसिद्धा । कृषिजीविनः उड्राः इति कथ्यन्ते । तेषां भाषायाः नाम आसीत् उड्रभाषा । भरतस्य नाट्यशास्त्रे उड्रभाषायाः सूचना प्राप्यते । महाभारतयुगे अस्य राज्यस्य नाम कलिङ्गः आसीत् । कलिङ्गाः अस्य भूखण्डस्य क्षत्रियसंप्रदायाः परमशूराः आसन् । तेऽपि महाभारतयुद्धे योगदानमकुर्वन् । सहस्राणां कलिङ्गवीराणां मातृभूमेः कृते आत्मबलिदानं दृष्ट्वा व्यथितः अशोकः तदैव युद्धवर्जनं कर्त्तुं निष्पत्तिं चकार । असौ धवलगिरौ बौद्धधर्मेण दीक्षितः सन् देशे विदेशे च धर्मप्रचारमकरोत् । तत्रत्यः शान्तिस्तूपः कलिङ्गकीर्त्तिं स्मारयति ।

इतिहासप्रसिद्धः कलिङ्गसम्राट् महामेघवाहनः ऐरखारवेलः मगधं विजित्य विशालं जिनासनमानीय उदयगिरौ अस्थापयत् । खण्डगिरौ खोदिताः हस्तिगुहादयः तथा शिलालेखाश्च खारवेलस्य विजयगाथां घोषयन्ति । अशोकस्य प्रभावेण ललितगिरि- पुष्पगिरि– रत्नगिरिप्रभृतिस्थलेषु यथा बौद्धधर्मस्य प्रचारोऽभवत् खारवेलस्य समये जैनधर्मस्य तथा प्रचारोऽभूत्। परवर्त्तिनि काले अत्र सनातनधर्मस्य अभ्युदयेन साकं विविधमन्दिराणां निर्माणमभवत् । श्रीक्षेत्रस्य श्रीमन्दिरं भुवनेश्वरस्य श्रीलिङ्गराजमन्दिरं राजराणीमन्दिरं याजपुरस्य विरजामन्दिरं शरणकुलस्य लडुकेश्वरमन्दिरम् ओड़ग्रामस्थित-श्रीरघुनाथमन्दिरं रेमुणास्थितं क्षीरचोरागोपीनाथमन्दिरं खिचिंस्थितं कीचकेश्वरीमन्दिरं केन्द्रापडायाः बलदेवजीउमन्दिरं कोणार्कस्य सूर्यमन्दिरं सम्बलपुरस्य समलेश्वरीमन्दिरं एतानि मन्दिरेषु प्रसिद्धानि । एतेषु श्रेष्ठं श्रीजगन्नाथमन्दिरम् । भक्तानां परमाराध्यः श्रीजगन्नाथः पुरुषात्तमः कैवल्यप्रदायकः इति प्रसिद्धिः । यद्यपि सर्वाणि मन्दिराणि विविधस्थापत्यकलानिदर्शनानि भवन्ति तथापि उत्कलीयकारुकार्याणां समुत्कर्षः कोणार्कमन्दिरे एव प्रकटीकृतः । सूर्य्योपासनार्थं निर्मितस्य चन्द्रभागोपकण्ठावस्थितस्य मन्दिरस्यास्य भग्नावशेषः अद्यापि परिदृश्यते । पाषाणखण्डेषु याः सूक्ष्मकलाः उत्खनिताः ताः दर्शकानां विस्मयं जनयन्ति मनांसि हरन्ति च । रथावृतेः मन्दिरस्यास्य द्वादशचक्राणि मन्दिरगात्रे खोदिताः मूर्त्तयः लतापत्रादयश्च सजीवाः इव प्रतिभान्ति । सूक्ष्मकलायाः चरमोत्कर्षात् अस्य भूखण्डस्य नाम

उत्कल: इति अनुमीयते । उत्कृष्टा: कला: यस्मिन् स उत्कल: ।

वस्तुत: उत्कल-कलिङ्ग-कोशलोड्र-कंगोदरूपेण परिचितानां देशानां भूखण्डांशै: संप्रति ओडिशाराज्यं परिचितम् । एकाधारेण उड्रीया: कृषका:, कलिङ्गा: वीरा:, कर्मकुशला: कोशलजा:, संगीतविशारदा: कंगोदजा: उत्कलीया: कलाकोविदा: आरण्यका: आदिवासिनश्च स्वकृतित्वच्छलेन ओडिशाराज्यस्य गौरवं प्रख्यापयन्ति । जातीयसंगीते प्रयुक्तमुत्कलमिति पदम् ओडिशानिमित्तकमेव ।

उत्कलस्य सांस्कृतिकपरम्परा अतीव समृद्धा । कार्त्तिकपूर्णिमायां वहित्रवन्दनपर्व प्राचीननौवाणिज्यस्य स्मृतिमावहति । श्रीक्षेत्रे श्रीजगन्नाथस्य रथयात्रा विश्वप्रसिद्धा । अत्र वैष्णव-शैव-शाक्त-सौर-शिख-ख्रीष्टीय-महम्मदीयप्रभृतिमतावलम्बिनां निर्द्वन्द्व: समावेश: दृश्यते । श्रीजगन्नाथस्य महाप्रसादं जाति-धर्म-वर्णनिर्विशेषम् एकत्र उपविश्य भुञ्जते । आदिशंकराचार्य: श्रीक्षेत्रमागत्य श्रीजगन्नाथस्य दर्शनं कृत्वा तत्क्षेत्रं परमतीर्थं मत्वा तत्र गोवर्द्धनपीठम् अस्थापयत् । अस्मिन् राज्ये महिमधर्म: समुद्भूत: ।

पुराणप्रसिद्धनानातीर्थसमन्वितं शंखक्षेत्र-चक्रक्षेत्र-गदाक्षेत्र-पद्मक्षेत्र-तुलसीक्षेत्रादियुक्तं प्राकृतिकसंपत्परिपूर्णं श्यामलवनश्रीपरिशोभितं बहुनदीसंवृद्धं चिलिकादिह्रदै: मनोरममिदं राज्यं पर्यटकानामतीव आकर्षणीयम् । न केवलमेतत् भूमिरियं बहुमहापुरुषाणां जन्मदात्री । साहित्यदर्पणस्य लेखक: विश्वनाथकविराज:, गीतगोविन्दस्य लेखक: भक्तकवि: जयदेव:, पञ्चतन्त्रकार: विष्णुशर्मा, श्रीमद्भगवद्गीताया: प्रसिद्ध: भाष्यकार: श्रीधरस्वामी च अस्मिन् भूखण्डे जाता: । उत्कलभाषाया: कविषु सारलादास:, बलरामदास:, अतिबडिजगन्नाथदास:, महापुरुष: अच्युतानन्ददास:, महापुरुष: यशोवन्तदास:, महापुरुष: अनन्तदास:, हाडिदास:, सालवेग:, उपेन्द्रभञ्ज:, बलदेवरथ:, दीनकृष्णदास:, भक्तचरणदास:, अभिमन्युसामन्तसिंहार इत्यादय: सुप्रसिद्धा: । आधुनिकयुगे फकिरमोहन-राधानाथ-गङ्गाधर-मधुसूदन-कान्तकविलक्ष्मीकान्तप्रभृतय: उत्कलभारतीं स्वकीयै: रचनास्तवकै: अलंकृतवन्त: ।

उत्कलप्रदेशस्य स्थिति: यदा विपन्नाभवत् तदा उत्कलगौरव-मधुसूदन: उत्कलसम्मिलनीमाध्यमेन एतां जातिमुदबोधयत् । फलत: १९३६ ख्रीष्टाब्दे स्वतन्त्रउत्कलप्रदेश: अभवत् । बक्सिजगबन्धु: बाजिराउत: लक्ष्मण नायक: विर्सा मुण्डा बाघायतिन् उत्कलमणि: गोपबन्धु: आचार्य: हरिहर: मनीषी नीलकण्ठ: आदिनाट्यकार: जगमोहनलाला वाग्मी विश्वनाथ: कर्मवीर: गौरीशंकर: महाराज-श्रीकृष्णचन्द्रनारायणगजपतिदेव: महाराजश्रीरामचन्द्र भञ्जदेव: इत्यादय: भारतस्य स्वतन्त्रतासंग्रामे योगदानं कृत्वा चिरस्मरणीया: भवन्ति ।

संगीतनाट्यकलादिषु उत्कलस्य अपि प्रभूता प्रतिष्ठा विद्यते । ओडिशीनृत्यम् ओडिशीसंगीतं सम्बलपुरीनृत्यं सम्बलपुरीगीतं वैष्णवपाणिगीतिनाट्यं रघुराजपुरस्य गोटिपुअनृत्यं जनजातिवनवासिनृत्यं तथा ओडिशीपट्टचित्रं सम्बलपुरीवस्त्रं कटकस्य स्वर्ण-रौप्यनिर्मित-सूक्ष्मालंकारा: स्वीयवैशिष्ट्येन समग्रे विश्वेऽपि समादृता: सन्ति ।

उत्कलस्य सागरः महोदधिः उत्कलस्य नदी महानदी पर्वतः महेन्द्रः राजपथः बडदाण्डः महाप्रभुः श्रीजगन्नाथः प्रसादः महाप्रसादः एवं प्रकारेण महाभूमिरियं युगे युगे महीयसी । उत्कलस्य विविधमतावलम्बिनाम् उपासनापीठानि सांस्कृतिक-सामाजिकमहोत्सवाः पर्वाणि च सांप्रदायिक-सद्भावनायाः तथा सर्वधर्मसमन्वयस्य वार्त्तामावहति । कपिलसंहितायामुक्तं यत्-

पृथिव्यां भारतं श्रेष्ठं भारते चोत्कलः स्मृतः ।
उत्कलस्य समो देशः क्वापि नास्ति महीतले ।।

## टिप्पणी

ओडिशाराज्यम् - ଓଡ଼ିଶାରାଜ୍ୟ (उत्कल-कलिङ्ग-कोशल-ओड्र-कंगोदरूपेण परिचितानां देशानां भूखण्डांशैः संप्रति ओडिशाराज्यं परिचितम्) । कैवल्यप्रदायकम् - ମୁକ୍ତିଦାୟକ (मुक्तिदायकम्) । शङ्खक्षेत्रम् - ପୁରୀ (श्रीक्षेत्रम् / पुरी) । चक्रक्षेत्रम् - ଭୁବନେଶ୍ୱର (हरिहरक्षेत्रम् / भुवनेश्वरम्) । गदाक्षेत्रम् - ଯାଜପୁର (विरजाक्षेत्रम् / वराहक्षेत्रम् / याजपुरम् / यज्ञपुरम्) । पद्मक्षेत्रम् - କୋଣାର୍କ (अर्कक्षेत्रम् / कोणार्कम्) । तुलसीक्षेत्रम् - କେନ୍ଦ୍ରାପଡ଼ା (मणिब्रह्मबलदेवक्षेत्रम् / केन्द्रापडा / कन्दरपत्तनम् / केन्द्रपल्ली) । कान्तकविः लक्ष्मीकान्तमहापात्रः - 'वन्दे उत्कलजननी' इति कवितायाः रचयिता । गोवर्द्धनपीठम् - ପୁରୀ ଶଙ୍କରାଚାର୍ଯ୍ୟମଠ (श्रीक्षेत्रे शङ्करप्रतिष्ठितः मठः) ।

## अभ्यासः

**1. निजभाषया वाक्यद्वयेन वाक्यत्रयेण वा उत्तरं लिखत ।**

(क) कलिङ्गवीराणां कीदृशं गौरवमासीत् ?

(ख) खारवेलस्य विजयगाथा कीदृशी ?

(ग) सनातनधर्मस्य अभ्युदयेन साकं किं परिवर्त्तनं जातम् ?

(घ) किमर्थं भूखण्डस्य नाम उत्कलमिति अनुमीयते ?

(ङ) ओडिशाराज्यस्य गौरवं के प्रख्यापयन्ति ?

**2.** **निजभाषया एकपदात्मकं / अतिसंक्षिप्तम् उत्तरं लिखत ।**

(क) ओडिशाराज्यं कीदृशम् ?

(ख) शान्तिस्तूप: कुत्र अस्ति ?

(ग) इतिहासप्रसिद्ध: कलिङ्गसम्राट् क: ?

(घ) विरजामन्दिरं कुत्र वर्त्तते ?

(ङ) आचाण्डालब्राह्मणा: एकत्र किं भुञ्जते ?

(च) साहित्यदर्पणस्य लेखक: क: ?

(छ) का यात्रा विश्वप्रसिद्धा ?

(ज) उत्कलभूमि: केषां जन्मदात्री ?

(झ) पृथिव्यां किं तावत् श्रेष्ठम् ?

(ञ) गोवर्द्धनपीठम् क: स्थापितवान् ?

**3.** **सन्धिविच्छेदं कुरुत ।**

नामासीत्, तेऽपि, अभ्युदयेन, परमाराध्य:, जगन्नाथ:, रथाकृते:, महेन्द्र:, तदैव, महोत्सवा:, क्वापि ।

**4.** **सन्धिं कुरुत ।**

सम: + देश:, न + अस्ति, उत्कलस्य + अपि, अति + इव, अत्र + एव, भो + अन्ति, यदि + अपि, सूचना + अपि, वहि: + देशे, परम + आराध्य: ।

**5.** **रेखाङ्कितपदानां विभक्तिनाम लिखत ।**

(क) अशोक: बौद्धधर्मेण दीक्षित: ।

(ख) खण्डगिरौ खोदिता: हस्तिगूहादय: ।

(ग) दर्शकानां विस्मयं जनयति ।

(घ) सूक्ष्मकलाया: उत्कर्षात् अस्य नाम उत्कल: ।

(ङ) सुदृश्यमन्दिराणां निर्माणमभवत् ।

**6. रेखाङ्कितपदानां विभक्तिकारणं लिखत ।**

(क) पृथिव्यां भारतं श्रेष्ठम् ।

(ख) ताः दर्शकानां विस्मयं जनयति ।

(ग) स्वतन्त्रतासंग्रामे योगदानं कृत्वा चिरस्मरणीयाः भवन्ति ।

(घ) एवं प्रकारेण महाभूमिरियं युगे युगे महीयसी ।

(ङ) उत्कलस्य सागरः महोदधिः ।

**7. वाक्यानि रचयत ।**

आनीय, साकम्, अनुमीयते, आरभ्यः, परिदृश्यते, इति, अतीव ।

**8. शुद्धम् उत्तरं निरूपयत ।**

(क) के उड्राः इति कथ्यन्ते ?

(i) कृषिजीविनः (ii) मत्स्यजीविनः

(iii) सुखजीविनः (iv) बुद्धिजीविनः

(ख) अशोकः किं कर्त्तुं निष्पत्तिं चकार ?

(i) धर्मवर्जनम् (ii) युद्धवर्जनम्

(iii) देशवर्जनम् (iv) संघवर्जनम्

(ग) ओडिशाराज्ये कः धर्मः समुद्भूतः ?

(i) बौद्धधर्मः (ii) महिमधर्मः

(iii) ख्रीष्टधर्मः (iv) जैनधर्मः

(घ) कस्मिन् ख्रीष्टाब्दे स्वतन्त्रः उत्कलप्रदेशः अभवत् ?

(i) १९४७ (ii) १९३५

(iii) १९३६ (iv) १९६२

(ङ) श्रीक्षेत्रे कः गोवर्द्धनपीठम् अस्थापयत् ?

(i) वल्लभाचार्यः (ii) मध्वाचार्यः

(iii) शङ्कराचार्यः (iv) निम्बार्काचार्यः

**9. शून्यस्थानानि पूरयत । (कोष्ठकात्)**

(क) ______________ साहित्यदर्पणस्य लेखकः ।

(ख) ______________ पञ्चतन्त्रकारः ।

(ग) विरजामन्दिरं ______________ विद्यते ।

(घ) लतापत्रादयश्य ______________ इव प्रतिभान्ति ।

(ङ) उत्कृष्टाः ______________ यस्मिन् सः उत्कलः ।

| |
|---|
| विष्णुशर्मा, सजीवाः, कलाः, याजपुरे, विश्वनाथकविराजः |

●●●

# समयानुवर्त्तिता

*अयं विषय: डॉ. कुमारचन्द्रमिश्रेण रचित: । इदानीन्तनसमाजे जनेषु समयानुवर्त्तिताया: नितराम् अभाव: दृश्यते । समयानुवर्त्तिता कस्यचित् प्रतिष्ठितजनस्य महान् गुण: । छात्राणां स्वभावपरिवर्त्तनाय अयं विषय: पुस्तकेऽस्मिन् प्रदत्त: ।*

माधव: ग्रामविद्यालये पाठं समाप्य उच्चविद्यालयमगच्छत् । एकस्मिन् आवासिक-विद्यालये नामोल्लेखमकरोत् । पिता विद्यालयस्य छात्रावासे स्थातुं व्यवस्थां कृत्वा सर्वाणि साधनानि तस्मै दत्तवान् ।

विद्यालयस्य प्रथमदिवस: । पूर्वस्यां रात्रौ सूचनां प्राप्तवान् नववादने कक्षारम्भ: । माधव: विद्यालयं गन्तुं यदा सज्जीभवति तदा नववादनमभवत् । अनन्तरं स: मन्दं मन्दं विद्यालयमगच्छत् । यावदसौ कक्षासमीपमगच्छत् तावत् सर्वे छात्रा: कक्षायामुपस्थिता: आसन्, पाठस्यारम्भ: अपि अभवत् । शिक्षक: तस्मै कक्षायामुपवेष्टुमनुमतिं प्राददात् । परन्तु अवदत् - भो: छात्र ! भवान् यथाकालमागच्छतु ।

अपरेद्यु: यथासमयं कक्षां प्राप्तुमसौ चेष्टामकरोत् । तथापि केनापि कारणेन विलम्बोऽभवत् । स पुनश्च दशनिमेषविलम्बेन कक्षामागच्छत् । शिक्षक: पुनरपि अवदत्–वत्स ! भवान् यथाकालं नागच्छति इति महत् दु:खम् ।

छात्राणां पुरत: स: वारं वारं लज्जित: अपमानितश्चाभवत् । स व्यचिन्तयत् - तमन्तरेण अन्य: न कश्चित् छात्र: विलम्बेन आगच्छति । अत: तृतीयदिवसे बहुप्रयासेन पञ्चदशनिमेषेभ्य: पूर्वमेव विद्यालयमगच्छत् ।

यदा विद्यालयमपश्यत् तदा विद्यालयस्य मुख्यद्वारं पिहितमासीत् । एकोऽपि छात्र: शिक्षको वा न तत्रासीत् । साक्षात् पञ्चोननववादने विद्यालयस्य सेवक: आगच्छत् द्वारमुदघाटयत् च । क्रमेण सर्वे छात्रा: शिक्षकाश्च समागता: । साक्षात् नववादने घण्डानाद: जात: । अनन्तरं पाठस्यारम्भ: । एकोऽपि छात्र: विलम्बेन नागच्छत् । माधव: तद्दिने प्रसन्न: आसीत् । यत: स: पूर्वमेव आगतवान् । स: विस्मित: अभवत् - शिक्षक: पुनरवदत् - भवत: समयज्ञानं नास्ति ।

माधवोऽवदत् - श्रीमन् ! अद्याहं विलम्बेन नागच्छामि । पञ्चदशनिमेषेभ्य: पूर्वमागच्छामि । तथापि भवान् एवं वदति । मम मनसि दु:खम् । शिक्षक: सस्मितं बोधयति – विलम्बेन आगमनं तु न साधु । पञ्चदशनिमेषभ्य: पूर्वम् आगमनमपि न साधु । पूर्वमागत्य किं कृतम् ? द्वारमभित: अवस्थानं कृतम् । तस्मिन् समये स्वप्रकोष्ठे किञ्चित् अध्ययनं कर्त्तुं शक्यम् ।

एतत् श्रुत्वा लज्जितः माधवः शिक्षकस्य समीपे क्षमायाचनां कृतवान् । समयस्य मूल्यं च ज्ञातवान् । अन्यस्मिन् काले सर्वदा समयस्य परिपालनं तस्य महान् गुणः अभवत् ।

गच्छता कालेन शास्त्राध्ययनं कृत्वा स अवगतवान् यत्, अस्माकं भारतवर्षे यत् पञ्चाङ्गं प्रचलति तत् सर्वं भारतीयसमयगणनानुसारेण भवति । कदा सूर्योपरागः चन्द्रग्रहणं वा यथानिर्दिष्टं तदनुसारमेव भवति । कदाचित् क्षणमपि विलम्बो न भवति । ओडिशाराज्ये सामन्तचन्द्रशेखरस्य गणनानुसारं पञ्चाङ्गं प्रचलति । भारतीयानां समयज्ञानं नास्ति इति केचन मूढाः इण्डियान् टाइम् इति उक्त्वा यत् आत्मप्रवञ्चनं कुर्वन्ति तत् नोचितम् । समयानुवर्त्तिता मानवस्य महान् गुणः ।

## टिप्पणी

समाप्य - ଶେଷକରି (समापनं विधाय) । दत्तवान् - ଦେଲେ (अददात्) । प्राप्तवान् - ପାଇଲେ (लब्धवान्) । गन्तुम् - ଗମନ କରିବାକୁ (गमनं कर्त्तुम्) । मन्दं मन्दं - ଧୀରେ ଧୀରେ (धीरं धीरम्) । उपवेष्टुम् - ବସିବାକୁ (उपवेशनं कर्त्तुम्) । अपरेद्युः - ଅନ୍ୟଦିନ (अपरस्मिन् दिवसे) । चेष्टाम् - ଚେଷ୍ଟା (यत्नम्) । पुरतः - ଆଗରେ (अभितः) । प्रसन्नः - ଖୁସି (आनन्दितः) । श्रीमन् - ମହାଶୟ (महाशय) । किञ्चित् - କିଛି (अल्पम्) । केचन - କେତେକ (कतिपयाः) । साधनानि - ଦ୍ରବ୍ୟଗୁଡ଼ିକ (द्रव्याणि) । कक्षारम्भः - ଶ୍ରେଣୀଆରମ୍ଭ (कक्षायाः आरम्भः) । अनन्तरम् - ପରେ (इतः परम्) । असौ - ସେ (सः) । यथाकालम् - ଯଥା ସମୟରେ (यथासमयम्) । परन्तु - କିନ୍ତୁ (किन्तु) । पुनरपि - ପୁଣି ମଧ୍ୟ (पुनश्च) । समागताः - ଆସିଲେ (आगच्छन्) । आगतवान् - ଆସିଥିଲେ (आगच्छत्) । सस्मितम् - ମୁରୁକି ହସି (सहास्यम्) । सर्वदा - ସବୁବେଳେ (सर्वस्मिन् काले) । मूढाः - ମୂର୍ଖମାନେ (मूर्खाः) ।

## अभ्यासः

**1. निजभाषया वाक्यद्वयेन वाक्यत्रयेण वा उत्तरं लिखत ।**

(क) माधवः प्रथमदिवसे यदा कक्षासमीपमगच्छत् तदा किमपश्यत् ?

(ख) द्वितीयदिवसे शिक्षकः माधवं किमवदत् ?

(ग) तृतीयदिवसे माधवः विद्यालयं गत्वा किमपश्यत् ?

(घ) माधवः तृतीयदिवसे कथं विस्मितः अभवत् ?

(ङ) शिक्षकः सस्मितं माधवं किमबोधयत् ?

**2. निजभाषया एकपदात्मकं / अतिसंक्षिप्तम् उत्तरं लिखत ।**

(क) मानवस्य महान् गुणः कः ?

(ख) भारतीयानां समयज्ञानं नास्तीति के वदन्ति ?

(ग) ओडिशाराज्ये कस्य गणनानुसारं पञ्चाङ्गं प्रचलति ?

(घ) भारतीयसमय-गणनानुसारेण भारतवर्षे किं प्रचलति ?

(ङ) लज्जितः माधवः शिक्षकस्य समीपे किं कृतवान् ?

(च) कस्मिन् समये घण्टानादः जातः ?

(छ) विद्यालयस्य सेवकः कदा आगच्छत् ?

(ज) विद्यालयस्य किं पिहितमासीत् इति माधवः अपश्यत् ?

(झ) तृतीयदिवसे माधवः बहुप्रयासेन कस्मिन् समये विद्यालयम् अगच्छत् ?

(ञ) ग्रामविद्यालये कः पाठं समाप्य उच्चविद्यालयमगच्छत् ?

**3. सन्धिविच्छेदं कुरुत ।**

कक्षारम्भः, कक्षायामुपस्थिताः, प्राददात्, प्राप्तुमसौ, नागच्छति, केनापि, तमन्तरेण, एकोऽपि, तत्रासीत्, कश्चित् ।

**4. सन्धिं कुरुत ।**

पिहितम् + आसीत्, शिक्षकाः + च, एकः + अपि, पुनः + अवदत्, आगमनम् + अपि, द्वारम् + अभितः, शास्त्र + अध्ययनम्, क्षणम् + अपि, विलम्बः + न, न + अस्ति ।

**5. रेखाङ्कितपदानां विभक्तिनाम लिखत ।**

(क) पिता सर्वाणि साधनानि तस्मै दत्तवान् ।

(ख) सः विद्यालयम् अगच्छत् ।

(ग) भोः छात्र ! यथाकालंम् आगच्छतु ।

(घ) छात्राणां पुरतः लज्जितः अभवत् ।

(ङ) क्रमेण सर्वे छात्राः समागताः ।

**6. रेखाङ्कितपदानां विभक्तिकारणं लिखत ।**

(क) <u>स</u> पूर्वम् आगतवान् ।

(ख) श्रीमन् ! अहं <u>विलम्बेन</u> नागच्छामि ।

(ग) मम <u>मनसि</u> दुःखम् ।

(घ) गच्छता <u>कालेन</u> सः अवगतवान् ।

(ङ) <u>ओडिशाराज्ये</u> पञ्चाङ्गं प्रचलति ।

**7. वाक्यानि रचयत ।**

दत्तवान्, तस्मै, पूर्वम्, क्रमेण, पुरतः, अन्तरेण ।

**8. शुद्धम् उत्तरं निरूपयत ।**

(क) माधवः कदा कक्षारम्भः इति सूचनां प्राप्तवान् ?

(i) अष्टवादने (ii) दशवादने

(iii) नववादने (iv) पंचवादने

(ख) कः माधवाय कक्षायामुपवेष्टुम् अनुमतिं प्राददात् ?

(i) अध्यक्षः (ii) शिक्षकः

(iii) सैनिकः (iv) सेवकः

(ग) कदा घण्टानादः जातः ?

(i) नववादने (ii) एकादशवादने

(iii) सप्तवादने (iv) एकवादने

(घ) के इण्डियान् टाइम् इति उक्त्वा आत्मप्रवञ्चनं कुर्वन्ति ?

(i) शिक्षिताः (ii) अभिज्ञाः

(iii) मूढाः (iv) चतुराः

(ङ) कः शिक्षकस्य समीपे क्षमायाचनां कृतवान् ?

(i) प्रमोदः (ii) सत्यनारायणः

(iii) वृन्दावनः (iv) माधवः

**9. शून्यस्थानानि पूरयत । (कोष्ठकात्)**

(क) ____________ अध्ययनं कर्त्तुं शक्यम् ।

(ख) पूर्वमागमनमपि न ____________ ।

(ग) अद्य अहं ____________ नागच्छामि ।

(घ) मम ____________ दुःखम् ।

(ङ) छात्राणां ____________ सः लज्जितः अभवत् ।

| विलम्बेन, पुरतः, किञ्चित्, मनसि, साधु |
|---|

●●●

# मूढः सहायकः

*आधुनिक साहित्यिकेषु अन्यतमः विद्वान् डॉ. प्रमोदकुमारनायकः । अनेन अनेके कथाग्रन्थाः विरचिताः । अयं विषयः तद्विरचितेषु कथाविशेषेषु नूतनभावधारां सृजति । बालकानां चित्तविनोदनाय शिक्षणाय च अयं विषयः अत्र सन्निवेशितः ।*

अस्ति अवन्तिकायां द्वितीयचरकः राजवैद्यः अमृतकरः । तस्मिन् राज्ञः चन्द्रसेनस्य यथा विश्वासः तथैवाऽपि प्रजाकुलस्य । किमपि औषधीयं पत्रपुष्पादिकं स्वस्य जिह्वायां संस्थाप्य तस्य द्रव्यगुणपरीक्षणे असौ आसीत् सुदक्षः । राजवैद्यस्य रसशालासहायकत्वेन नियुक्तः स्वल्पविद्यः विकलबुद्धिः सर्वथा आत्मानं सर्वज्ञः इति चिन्तयति । एवमपि कदाचिदसौ स्वप्रभोः शास्त्रज्ञानविषये अन्येषां पुरतः सन्देहं प्रकटयति । स्वकीयाम् अपूर्वां कार्यदक्षतां स्वयमेव प्रशंसति । एकदा चिन्तयति राजवैद्यस्य सविधे कथं स्वकीयं पाण्डित्यं प्रमाणयिष्यतीति ।

एकस्मिन् दिवसे राजपुरात् राजवैद्येन सह विकलबुद्धिः आगच्छति। तदानीं हठात् असौ मार्गस्योपरि निपतितं कमपि पदार्थमानीय स्वस्य जिह्वायां स्थापयति । ततः कियत्क्षणेभ्यः परं तमेव मुखात् वहिः निक्षिपति । एतस्यावलोकनेन राजवैद्यः तमपृच्छत् किमेतदिति । ततः सः महतानन्देन मन्दं विहस्य कथयति - मान्याः ! श्रीमतां साहचर्येण बहुग्रन्थानुशीलनेन च ममाऽपि द्रव्यगुणपरीक्षणे बलीयसी दक्षता जायते । तदर्थम् अहमेवं करोमि । यतो हि मार्गस्य उपरि स्थितस्य एतस्य पदार्थस्य परीक्षणं विना गमनं दोषाय भवति । एतदर्थमहं स्वजिह्वायां स्थापयामि । नोचेत् यदि अज्ञानात् अस्योपरि आवयोः पादपातः स्यात्, तर्हि अवश्यं महत् पातकम् जायेत ।

स्वसहायकस्य मूर्खतामहङ्कारञ्च वीक्ष्य राजवैद्यः विहस्य एतादृशकार्यात् तं निराकरोति स्म ।

राजवैद्यः अमृतकरः न केवलं बहुशास्त्रदर्शी अपितु तस्य तात्कालिकी बुद्धिः आसीदनन्या । तदर्थं प्रकृतपरिस्थितिज्ञः अयं यथार्थत्वेन रोगस्य निदाने क्षमः भवति । एकदा उदरपीडामनुभवतः राज्ञः चिकित्सार्थं गतः राजवैद्यः खट्वायाः अधोभागे एकं भूचणकबीजम् अपश्यत् । अवश्यं राजा एतस्याधिकभक्षणेन उदररोगपीडितः अस्तीति स्थिरीकृत्य अवदत्–राजन् ! भूचणकानाम् अधिकभक्षणेन एतादृशी उदरपीडा भवतीति शास्त्रस्य सिद्धान्तः । यदि मम वचनं सत्यमस्ति, तर्हि सूचयतु । एतन्निशम्य स्वयं राजा अन्येऽपि च परिजनाः राजवैद्यस्य अपूर्वां निदानदक्षतां बहु प्रशंसन्ति स्म । तत्रापि उपस्थितः आसीत् स्वयं विकलबुद्धिः ।

राजवैद्य: इव रोगकारणं कुत्रचित् उक्त्वा स्वयं प्रशंसित: स्यात् इति व्यचिन्तयत् स: । एकदा राजवैद्य: मित्रालयमगच्छत् । अस्मिन् समये सेनापति: बाहुबली ज्वराक्रान्त: इति संवाद: आगत: । अत: अयमेव परम: सुयोग: स्वज्ञानस्य परीक्षणार्थमिति मत्वा स: स्वयमेव सेनापते: सदनम् अगच्छत् । एकस्या: खट्वाया: उपरि स्थित: सेनापति: ज्वरेण कम्पते । आत्मीया: तस्य दु:खाभिभूता: चतु:पार्श्वे दण्डायमाना: सन्ति । विकलबुद्धि: मिथ्यानाडीपरीक्षणं कृत्वा राजवैद्य: इव खट्वाया: अध: अपश्यत् । तदानीं तत्र सेनापते: प्रभुभक्त: विडाल: उपविष्ट: आसीत् । अयमेव योग्यताप्रमाणार्थमुपयुक्त: सुयोग: इति निश्चित्य असौ अवदत् - सेतापते ! अधिक-विडालभक्षणेन एतादृश: ज्वर: अवश्यं जायते इति शास्त्रीयं वचनम् । मन्ये रात्रौ भवान् अधिकं विडालमांसम् अखादत्, येन ज्वाराक्रान्त: अस्ति ।

तस्य वचनेन सेनापते: गृहजना: अतीव उत्क्षिप्ता: जाता: । अयमतीव मूर्ख: अस्ति इति विचिन्त्य ते तमेव ताडयित्वा तस्मात् नि:सारितवन्त: ।

राजवैद्य: अतीव परोपकारी सहृदयश्च आसीत् । कस्य दु:खावलोकनेन स: स्वयं क्षुण्ण: जायते । एष खलु तस्य महान् दुर्ल्लभ: गुण: । तदर्थम् अयं सर्वत्र प्रशंसित: पूजितश्च । एकस्मिन् दिवसे तस्य गृहं निकषा कश्चित् जन: मृत: । तस्यैका कन्या उच्चै: अक्रन्दत् । कृपालु: राजवैद्य: तत्र गत्वा तामेव कन्यां प्रबोधयन् अवदत् - पुत्रि ! मा क्रन्द । अद्यारभ्य अहमेव तव पिताऽस्मि । मृत: प्राणी न निवर्त्तते, तदर्थं पुन: कानि दिनानि वा क्रन्दिष्यसि । उत्तिष्ठ । स्वकर्त्तव्यपालनं कुरु ।

न केवलं राजवैद्यस्य प्रबोधनं बालिकां सन्तोषयति, अपितु तत्रोपस्थिता: मुग्धा: जना: राजवैद्यस्य उत्तुङ्गां मानविकतां प्रशंसन्ति स्म ।

तदारभ्य राजवैद्य: इव स्वमानविकताया: अपि परिचयं प्रदातुं इच्छुक: विकलबुद्धि: सुयोगाभिलाषी अभवत् । स्वल्पदिनाभ्यन्तरे अवन्तिकाया: वृद्ध: मन्त्री दिवंगत: । अन्यै: आत्मीयै: सह मन्त्रिण: पत्न्यपि भृशमक्रन्दत् । तदानीं तत्रोपस्थित: अयं सर्वेषां पुरत: उच्चै: प्रोवाच - वृद्धे । मानव: मरणशील: । न कदापि मृतक: पुनरायाति । तदर्थं मा विलप । यदि चित्ते नान्यथा चिन्तयसि, तर्हि अद्य प्रभृति अहमेव तव पति: भविष्यामि ।

तस्य वक्तव्येन क्रुद्धा: मृतमन्त्रिण: आत्मीया: तमेव तिरस्कुर्वन्ति स्म ।

परिशेषे सर्वासु घटनासु उपहसितोऽयं विकलबुद्धि: कदाचित् राजवैद्यं विहाय दूरस्थे ग्रामे स्वतन्त्ररूपेण चिकित्साकार्यं प्रारभत । रसशालायामवस्थानात् केषाञ्चन औषधानां कुट्टन-पेषणादि-कार्येषु नियुक्त: अयमपि कतिपयानां साधारणरोगाणां सामान्यचिकित्सां विजानाति । तस्या: आधारेण असौ स्वयं सम्पूर्णचिकित्सक: इति प्रमाणीकरोति। अपरञ्च शिशूनां चिकत्सा सुकरा

इति स्थिरीकृत्य आत्मनः परिचयं स्वयं विशिष्टशिशुरोगविशेषज्ञः इति प्रददाति । परन्तु अज्ञानात् अनभ्यासात् च बहवः शिशवः कालकवलिताः ।

यदा तेषां पितरः महता दुःखेन राज्ञः निकटे सर्वं वृत्तान्तं निवेदयन्ति, तदानीं सर्वं विचार्य कुपितः राजा विकलबुद्धिं देशान्तरीकरोति स्म ।

## टिप्पणी

संस्थाप्य - ରଖି (सस्थापनं कृत्वा) । सर्वथा - ସବୁମତେ (सर्वप्रकारेण) । स्वप्रभोः - ନିଜ ମାଲିକଙ୍କର (निजस्वामिनः) । प्रशंसति - ପ୍ରଶଂସା କରେ (प्रशंसां करोति) । अवलोकनेन - ଦେଖିବା ଦ୍ୱାରା (दर्शनेन) । जायेत - ହୋଇପାରେ (भवेत्) । निराकरोति स्म - ବାରଣ କଲେ (वारयति स्म) । तदर्थम् - ସେଥିପାଇଁ (तन्निमित्तम्) । क्षमः - ସମର୍ଥ (समर्थः) । अधोभागे - ତଳେ (तले) । ज्वराक्रान्तः - ଜ୍ୱରପୀଡ଼ିତ (ज्वरेण आक्रान्तः) । सदनम् - ଘର (गृहम्) । निश्चित्य - ସ୍ଥିରକରି (निश्चयं कृत्वा) । ताडयित्वा - ମାଡ଼ଦେଇ (ताडनं कृत्वा) । क्षुण्णः - ଦୁଃଖିତ (दुःखितः) । प्राणी - ଜୀବ (जीवः) । दिवंगतः - ମଲା (मृतः) । प्रोवाच - କହିଲେ (अवदत्) । विहाय - ଛାଡ଼ି (त्यक्त्वा) । सुदक्षः - ନିପୁଣ (सुनिपुणः) । सर्वज्ञः - ସର୍ବଜ୍ଞ (सर्वं जानाति यः) । पुरतः - ଆଗରେ (सम्मुखे) । प्रमाणयिष्यति - ପ୍ରମାଣ କରିବେ (प्रमाणं करिष्यति) । पातकम् - ପାପ (पापम्) । वीक्ष्य - ଦେଖି (दृष्ट्वा) । शास्त्रदर्शी - ଶାସ୍ତ୍ରଜ୍ଞ (शास्त्रं पश्यति यः) । निदाने - ରୋଗ ନିରୂପଣରେ (रोगनिरूपणे) । खट्वायाः - ଖଟର (पर्यङ्कस्य) । निशम्य - ଶୁଣି (श्रुत्वा) । संवादः - ଖବର (वार्त्ता) । विडालः - ବିରାଡ଼ି (मार्जारः) । उत्क्षिप्ताः - ରାଗିଲେ (कुपिताः) । निःसारितवन्तः - ବାହାରକଲେ (वहिः प्रेषितवन्तः) । निकषा - ପାଖରେ (समीपे) । प्रदातुम् - ଦେବାକୁ (प्रदानं कर्त्तुम्) । भृशम् - ଅତିଶୟ (सातिशयं / नितराम् / अत्यन्तम्) । अद्यप्रभृति - ଆଜିଠାରୁ (अद्यारभ्य) । कालकवलिताः - (मृताः) ।

## अभ्यासः

**1. निजभाषया वाक्यद्वयेन वाक्यत्रयेण वा उत्तरं लिखत ।**

(क) द्वितीयचरकस्य अमृतकरस्य संक्षिप्तं परिचयं लिखत ।

(ख) विकलबुद्धिः कः ? सः स्वभावेन कीदृशः ?

(ग) महता आनन्देन मन्दं विहस्य विकलबुद्धिः किं कथयति ?

(घ) राजवैद्यः अमृतकरः राज्ञः उदरपीडायाः कारणं किमिति अवदत् ?

(ङ) विकलबुद्धिः सेनापतेः मिथ्यानाडीपरीक्षणं कृत्वा किमवदत् ?

**2. निजभाषया एकपदात्मकं / अतिसंक्षिप्तम् उत्तरं लिखत ।**

(क) राजा कुपितः सन् कं देशान्तरीकरोति स्म ?

(ख) अज्ञानात् अनभ्यासात् च के कालकवलिताः भवन्ति ?

(ग) विकलबुद्धिः राजवैद्यं विहाय स्वतन्त्ररूपेण किं प्रारभते ?

(घ) कः पुनः नायाति ?

(ङ) राजवैद्यः अमृतकरः कुत्र आसीत् ?

(च) कः स्वल्पविद्यः ?

(छ) कः बहुशास्त्रदर्शी ?

(ज) राजवैद्यः खट्वायाः अधोभागे किमपश्यत् ?

(झ) विकलबुद्धिः सेनापतेः खट्वायाः अधोभागे किमपश्यत् ?

**3. सन्धिविच्छेदं कुरुत ।**

अयमपि, प्रारभत, उपहसितोऽयम्, तिरस्कुर्वन्ति, तमेव, कदापि, प्रोवाच, पत्न्यपि, भृशमक्रन्दत्, सुयोगाभिलाषी ।

**4. सन्धिं कुरुत ।**

अद्य + आरभ्य, अहम् + एव, ताम् + एव, दुःख + अवलोकनेन, अति + एव, दुःख + अभिभूताः, मित्रालयम् + अगच्छत्, तत्र + अपि, सत्यम् + अस्ति, अस्य + उपरि ।

**5. रेखाङ्कितपदानां विभक्तिनाम लिखत ।**

(क) अवन्तिकायां राजवैद्यः अमृतकरः आसीत् ।

(ख) विकलबुद्धिः आत्मानं सर्वज्ञ इति चिन्तयति ।

(ग) राजवैद्यस्य सविधे पाण्डित्यं प्रमाणयिष्यति ।

(घ) असौ मार्गस्य उपरि पतितं पदार्थमानीय स्वजिह्वायां स्थापयति ।

(ङ) पदार्थस्य परीक्षणं विना गमनं दोषाय भवति ।

**6. रेखाङ्कितपदानां विभक्तिकारणं लिखत ।**

(क) अज्ञानात् अस्योपरि आवयोः पदपातः स्यात् ।

(ख) अयं रोगस्य निदाने क्षमः भवति ।

(ग) भूचणकानाम् अधिकभक्षणेन उदरपीडा भवति ।

(घ) सः सेनापतेः सदनमगच्छत् ।

(ङ) सेनापतेः गृहजनाः उत्क्षिप्ताः जाताः ।

**7. वाक्यानि रचयत ।**

विश्वासः, पुरतः, सह, परम्, वहिः, उपरि, विना, इति, निकषा, यावत् ।

**8. शुद्धम् उत्तरं निरूपयत ।**

(क) अवन्तिकायां द्वितीयचरकः राजवैद्यः कः आसीत् ?

(i) श्रीकरः (ii) प्रभाकरः

(iii) अमृतकरः (iv) भास्करः

(ख) किं विना गमनं दोषाय भवति ?

(i) निरीक्षणं (ii) परीक्षणं

(iii) अनुक्षणं (iv) प्रतिक्षणम्

(ग) भूचणकानाम् अधिकभक्षणेन किं भवतीति शास्त्रस्य सिद्धान्तः ?

(i) पदपीड़ा (ii) बाहुपीड़ा

(iii) शिराः पीडा (iv) उदरपीडा

(घ) परिजनाः कस्य अपूर्वां निदानदक्षतां बहु प्रशंसितवन्तः ?

(i) राजवैद्यस्य (ii) दन्तवैद्यस्य

(iii) योगवैद्यस्य (iv) शल्यवैद्यस्य

(ङ) कः सुयोगाभिलाषी अभवत् ?

(i) विकलबुद्धिः (ii) क्षुद्रबुद्धिः

(iii) मन्दबुद्धि (iv) सुबुद्धिः

**9. शून्यस्थानानि पूरयत । (कोष्ठकात्)**

(क) ______________ निकटे पितरः सर्वं वृत्तान्तं निवेदयन्ति ।

(ख) बहवः शिशवः ______________ ।

(ग) ______________ सह विकलबुद्धिः आगच्छति ।

(घ) अस्य उपरि आवयोः ______________ स्यात् ।

(ङ) ______________ निदाने अयं क्षमः भवति ।

| |
|---|
| राजवैद्येन, रोगस्य, राज्ञः, कालकवलिताः, पादपातः |

●●●

# सम्भाषणम् - (प्रथमम्)

**(मार्गे पूजा नरेन्द्रेण सह मिलति ।)**

पूजा - अरे नरेन्द्र ! कुशलं किम् ?

नरेन्द्रः - आम् कुशलम् । अधुना भवती कुत्र पठति ?

पूजा - अधुना अहं शहीद-स्मारकविद्यालये पठामि । भवान् कुत्र पठति ?

नरेन्द्रः - अहं शोभनीय-विद्यालये पठामि । भवत्याः विद्यालये कति छात्राः पठन्ति कति शिक्षकाः च सन्ति ?

पूजा - मम विद्यालये प्रायेण पञ्च शतानि छात्राः पठन्ति । प्रायेण पञ्चविंशतिः शिक्षकशिक्षिकाः सन्ति । भवतः विद्यालये क्रीडाङ्गनमस्ति वा ?

नरेन्द्रः - मम विद्यालयस्य समीपे एकं विशालं क्रीडाङ्गनमस्ति । अवसरसमये सर्वे छात्राः क्रीडन्ति । अस्माकं क्रीडाशिक्षकः अतीव उत्तमः जनः । सः तत्र उपस्थितो भवति । भवत्याः विद्यालये उद्यानमस्ति वा ?

पूजा - आम्, मम विद्यालये एकं रमणीयमुद्यानं वर्त्तते । तत्र अनेके पुष्पवृक्षाः सन्ति । पुष्पेषु भ्रमराः गुञ्जन्ति । तत्र बालानां कृते दोला-व्यवस्था अस्ति । वयं तत्र नित्यं गच्छामः सानन्दं क्रीडामः च । भवतः विद्यालये पाठागारम् अस्ति वा ?

नरेन्द्रः - मम विद्यालये एकं विशालं पाठागारमस्ति । तत्र अनेकानि पुस्तकानि सन्ति । विविधाः पत्रिकाः आयान्ति । तत्र नीरवपठनस्य व्यवस्था अस्ति । विद्यालयस्य छात्राः तत्र नित्यं गच्छन्ति पठन्ति च । भवत्याः विद्यालयस्य परिसरः कथमस्ति ?

पूजा - अस्माकं विद्यालयस्य परिसरः नितरां रमणीयः । विद्यालयं परितः शोभनं प्राचीरं विद्यते । तत्र अनेके वृक्षाः राजन्ते । वृक्षच्छायासु छात्राः उपविश्य पाठं पठन्ति । भवतः विद्यालये अन्ये के विभागाः सन्ति ?

नरेन्द्रः - अस्माकं विद्यालये बालचरविभागः, जातीयसमर-शिक्षार्थिवाहिनी, सबुजवाहिनी, रेड्क्रसविभागः, गाइड्विभागः एवं प्रकारेण अनेके विभागाः सन्ति । छात्राः साग्रहम् एतेषु विभागेषु योगदानं कुर्वन्ति । प्रशिक्षणं प्राप्य योग्याः भवन्ति । भवत्याः प्रधानशिक्षकस्य नाम किम् ?

पूजा - अस्माकं विद्यालये प्रधानशिक्षकः नास्ति । प्रधानशिक्षिका अस्ति । तस्याः नाम सत्यप्रिया । सा अतीव योग्या छात्रावत्सला चापि ।

# सम्भाषणम् - (द्वितीयम्)

**श्रीक्षेत्रदर्शनम्**

रामः - कदा पुरीतः आगच्छः ?

माधवः - ह्यः सायंकाले आगच्छम् ।

रामः - भ्रमणं सुखकरमासीत् किम् ?

माधवः - आम्, सुखकरमासीत् । पञ्चमे दिनाङ्के प्रातः एव प्राप्तवान् । त्रीणि दिनानि स्थित्वा आगच्छम् ।

रामः - श्रीक्षेत्रे किं किमपश्यः ?

माधवः - तत्र श्रीमन्दिरमपश्यम् । मन्दिरे जगन्नाथं बलभद्रं चान्तरा सुभद्रा राजते । श्रीमन्दिरं परितः अनेकानि लघुमन्दिराणि सन्ति । तत्रापि देवाः पूजिताः भवन्ति । आनन्दविपण्यां महाप्रसादमपि अखादम् ।

रामः - सागरतीरं नागच्छः किम् ?

माधवः - तदपि अपश्यम् । सागरस्य दृश्यमतीव सुखप्रदम् । अनेके यात्रिणश्चापि तत्र आसन् । केचन सागरस्नानमकुर्वन् । वेलाभूमिः नितरां मनोहरा ।

रामः - गुण्डिचामन्दिरं नागच्छः वा ?

माधवः - आम्, श्रीमन्दिरतः गुण्डिचामन्दिरपर्यन्तं पद्भ्यामगच्छम् । प्रतिवर्षं श्रीजगन्नाथः बलभद्रः सुभद्रा सुदर्शनः च त्रिभिः रथैः राजमार्गे यात्रां कुर्वन्ति । या रथयात्रा नाम्ना विश्वप्रसिद्धा ।

रामः - श्रीक्षेत्रे अन्यत् किमपश्यः ?

माधवः - तत्र अनेकानि पुण्यस्थानानि सन्ति । तेषु लोकनाथ-गुण्डिचामन्दिर-नरेन्द्र-मणिकर्णिका-इन्द्रद्युम्नादीनि स्थानानि पवित्राणि । पञ्चतीर्थानि तु श्वेतगङ्गा-मार्कण्डेयं-रोहिणीकुण्डं-चक्रतीर्थं-महोदधिश्च ।


रामः - श्रीक्षेत्रे कानि प्रमुख-शिक्षानुष्ठानानि सन्ति ?

माधवः - श्रीक्षेत्रे श्रीजगन्नाथ-संस्कृत-विश्वविद्यालयः, सामन्तचन्द्रशेखरस्वयंशासितमहाविद्यालयः, राष्ट्रियसंस्कृतसंस्थानस्य सदाशिवपरिसरः, वेदकर्मकाण्डमहाविद्यालयः, नीलाचलचतुष्पाठी इत्यादीनि शिक्षानुष्ठानानि सन्ति । यत्र भारतवर्षस्य विभिन्नेभ्यः प्रान्तेभ्यः विद्यार्थिनः समागत्य अध्ययनं कुर्वन्ति ।


# समयः

**-वादनम्**


कः समयः ? इति उदाहरणं पश्यत, अक्षरैः लिखत-




उदाहरणम्- एकवादनम् ............ (1.00)




द्विवादनम् ............ (2.00)




त्रिवादनम् ............ (3.00)




............ (4.00)




............ (5.00)




............. (6.00)




............ (7.00)




............ (8.00)




............. (9.00)



............ (10.00)




............ (11.00)




............. (12.00)


क: समय: ? इति उदाहरणं पश्यत, अक्षरै: लिखत-




उदाहरणम् - सपादैकवादनम् (1.15)




सपादद्विवादनम् (2.15)




सपादत्रिवादनम् (3.15)




............. (4.15)




............. (5.15)




............. (6.15)




............. (7.15)




............. (8.15)




............. (9.15)



............. (10.15)




............. (11.15)




............. (12.15)

### सार्ध.....


क: समय: ? इति उदाहरणं पश्यत, अक्षरै: लिखत-




उदाहरणम् - सार्धैकवादनम् ............... (1.30)




सार्धद्विवादनम् ............... (2.30)




सार्धत्रिवादनम् ............... (3.30)




............. (4.30)




............. (5.30)




............. (6.30)




............. (7.30)




............. (8.30)




............. (9.30)



............. (10.30)




............. (11.30)




............. (12.30)

## पादोन....


क: समय: ? इति उदाहरणं पश्यत, अक्षरै: लिखत-




उदाहरणम् - पादोनद्विवादनम् ............... (1.45)




पादोनत्रिवादनम् ............... (2.45)




पादोनचतुर्वादनम् ............... (3.45)




............. (4.45)




............. (5.45)




............. (6.45)




............. (7.45)




............. (8.45)




............. (9.45)



............. (10.45)






............. (11.45)






............. (12.45)

**ऊन-अधिक- प्रयोगः**




कः समयः ? इति उदाहरणं पश्यत, अक्षरैः लिखत-




उदाहरणम् - पञ्चोनद्विवादनम् ............... (1.55) दशोनत्रिवादनम् ............... (2.50) पञ्चाधिकपञ्चवादनम् ............... (5.05)


............. (7.05) ............. (10.10) ............. (11.05)


............. (8.50) ............. (12.05) ............. (7.55)


............. (12.55) ............. (3.10) ............. (5.05)




............... (6.10)




............... (6.50)




............... (6.55)




............. (8.10)




............. (2.10)




............. (9.05)



............. (11.50)



............. (11.55)



............. (12.10)

## अभ्यासप्रश्नाः

**कः समयः इति अक्षरैः लिखत -**

**1. उदाहरणम् - 9.15 - सपादनववादनम्**

(क) 3.15 – ............................................... ।

(ख) 5.15 – ............................................... ।

(ग) 8.15 – ............................................... ।

(घ) 10.15 – ............................................... ।

(ङ) 12.15 – ............................................... ।

**2. उदाहरणम् - 11.30 - सार्धैकादशवादनम् ।**

(क) 2.30 – ............................................... ।

(ख) 4.30 – ............................................... ।

(ग) 6.30 – ............................................... ।

(घ) 8.30 – ............................................... ।

(ङ) 12.30 – ............................................... ।

**3. उदाहरणम् - 4.45 - पादोनपञ्चवादनम् ।**

(क) 6.45 – ............................................... ।

(ख) 8.45 – ............................................... ।

(ग) 9.45 – ............................................... ।

(घ) 11.45 – ............................................... ।

(ङ) 2.45 – ............................................... ।

4. **उदाहरणम् - 12.05 - पञ्चाधिकद्वादशवादनम् ।**

(क) 2.05 – ............................................... ।

(ख) 4.10 – ............................................... ।

(ग) 5.20 – ............................................... ।

(घ) 4.55 – ............................................... ।

(ङ) 2.50 – ............................................... ।

5. **उदाहरणं पश्यत, वाक्यानि रचयत ।**

**उदाहरणम् - प्र-**सः 5.00 शय्यात्यागं करोति ।

**उ -** सः पञ्चवादने शय्यात्यागं करोति ।

(क) **प्रं** - अहं 3.30 स्नानं करोमि ।

**उ** -.............................................. ।

(ख) **प्रं** - सा 7.45 देवपूजनं करोति ।

**उ** -.............................................. ।

(ग) **प्रं** - एषः 8.30 अल्पाहारं करोति ।

**उ** -.............................................. ।

(घ) **प्रं** - वयं 10.00 विद्यालयं गच्छामः ।

**उ** -.............................................. ।

(ङ) **प्रं** - भवान् 9.30 गृहम् आगच्छतु ।

6. **उदाहरणं पश्यत, समयम् अक्षरैः विलिख्य प्रश्नानामुत्तरं लिखत ।**

**उदाहरणम् - प्र-** त्वं कदा स्नानं करोषि ? (6.30)

**उ -** अहं सार्धषड्वादने स्नानं करोमि ।

(क) भवती कदा विद्यालयं गच्छति ? (9.45)

(ख) सांस्कृतिककार्यक्रमः कदा भविष्यति ? (10.00)

(ग) पिता कदा आगमिष्यति ? (4.30)

(घ) वैद्यस्य आगमनकाल: क: ? (7.15)

(ङ) कदा सूर्योदय: भवति ? (5.05)

**8. उदाहरणं पश्यत, उत्तरवाक्यस्य प्रश्नान् लिखत ।**

कदा........................

........................वादने

**उदाहरणम् - प्र -** छात्रा: कदा भोजनं कुर्वन्ति ?

**उ -** छात्रा: नववादने भोजनं कुर्वन्ति ।

(क) पूजक: दशाधिकसप्तवादने देवं पूजयति ।

(ख) यानं दशाधिकदशवादने आगमिष्यति ।

(ग) मुख्यमन्त्री पञ्चोनाष्टवादने भुवनेश्वरम् आगमिष्यति ।

(घ) पादोनद्वादशवादने मध्यावकाश: ।

(ङ) सपादनववादने अतिथय: आगच्छन्ति ।

# सम्भाषणम् - (तृतीयम्)

- भवान् / भवती कदा उत्तिष्ठति ?

- अहं पञ्चवादने उत्तिष्ठामि ।

- कदा दन्तमार्जनं करोति ?

- सपादपञ्चवादने दन्तमार्जनं करोमि ।

- कदा अल्पाहारं करोति ।

- प्रातः सप्तवादने अल्पाहारं करोमि ।

- कदा गृहपाठं लिखति ?

- सार्धसप्तवादनतः सार्धनववादनपर्यन्तं गृहपाठं लिखामि ।

- कदा स्नानं करोति ?

- सार्धनववादने स्नानं करोमि ।

- कदा विद्यालयं गच्छति ?

- दशवादने विद्यालयं गच्छामि ।

- कदा प्रार्थनासभा भवति ?

- सपाददशवादने प्रार्थनासभा भवति ।

- विद्यालये किं किं पठति ?

- विद्यालये संस्कृतं मातृभाषां गणितं विज्ञानम् इतिहासं भूगोलं च पठामि ।

- कदा गृहमागच्छति ?

- चतुर्वादने गृहमागच्छामि ।

- कदा क्रीडति ?

- सार्धचतुर्वादनतः पादोनषड्वादनं यावत् क्रीडामि ।

- कदा संध्यावन्दनं करोति ?

- सायं सपादषड्वादने संध्यावन्दनं करोमि ।

- रात्रिभोजनं कदा भवति ?

- रात्रौ सार्धनववादने रात्रिभोजनं करोमि ।

# नीतिवाणी

*सकलप्राणिषु मानवः श्रेष्ठः । तथापि समाजे सदा शान्तिः न परिलक्ष्यते । तत्र कारणं तावत् मानवस्य लोभः मोहः अविवेकिता चापि । महापुरुषाः मानवसमाजस्य दोषं दृष्ट्वा तेषां दूरीकरणार्थं नीतिवाक्यानि रचयन्ति । तानि नीतिवाक्यानि रत्नसदृशानि भवन्ति । संस्कृतनीतिकारेषु चाणक्य-भर्तृहरि-मनु-व्यास-वाल्मीकि-कामन्दक-पराशर-शंकरप्रभृतयः प्रसिद्धाः । तैः रचितेभ्यः नीतिरत्नेभ्यः कानिचित् अत्र संगृहीतानि । तानि अस्माकम् अज्ञानान्धकारदूरीकरणाय प्रदीपाः इव विभान्ति ।*

१. जलबिन्दुनिपातेन क्रमशः पूर्यते घटः ।
स क्रमः सर्वविद्यानां धनस्य च धर्मस्य च ।।

२. उपदेशो हि मूर्खाणां प्रकोपाय न शान्तये ।
पयःपानं भुजङ्गानां केवलं विषवर्धनम् ।।

३. नारिकेलसमाकारा दृश्यन्तेऽपि हि सज्जनाः ।
अन्ये वदरिकाकारा बहिरेव मनोहराः ।।

४. विना कार्येण ये मूढा गच्छन्ति परमन्दिरम् ।
अवश्यं लघुतां यान्ति कृष्णपक्षे यथा शशी ।।

५. परोपकाराय फलन्ति वृक्षाः
परोपकाराय वहन्ति नद्यः ।
परोपकाराय दुहन्ति गावः
परोपकारार्थमिदं शरीरम् ।

६. नमन्ति फलिनो वृक्षा नमन्ति गुणिनो जनाः ।
शुष्कवृक्षाश्च मूर्खाश्च न नमन्ति कदाचन ।

७. मलयाचलगन्धेन त्विन्धनं चन्दनायते ।
तथा सज्जनसंगेन दुर्जनः सज्जनायते ।।

८. रूपयौवनसम्पन्ना विशालकुलसम्भवाः ।
विद्याहीना न शोभन्ते निर्गन्धा इव किंशुकाः ।

९. दुर्बलस्य बलं राजा बालानां रोदनं बलम् ।
बलं मूर्खस्य मौनित्वं चौराणामनृतं बलम् ।।

१०. अकृत्यं नैव कर्त्तव्यं प्राणत्यागेऽपि संस्थिते ।
न च कृत्यं परित्याज्यमेष धर्मः सनातनः ।।

११. हिंसाबलमसाधूनां राज्ञां दण्डविधिर्बलम् ।
शुश्रूषा च बलं स्त्रीणां क्षमा गुणवतां बलम् ।।

१२. स्वभावं न जहात्येव साधुरापद्गतोऽपि सन् ।
कर्पूरः पावकस्पृष्टः सौरभं लभतेतराम् ।।

१३. अहिंसा परमो धर्मस्तथाहिंसा परं तपः ।
अहिंसा परमं सत्यं यतो धर्मः प्रवर्त्तते ।।

१४. सुखस्य दुःखस्य न कोऽपि दाता
परो ददातीति कुबुद्धिरेषा ।
अहं करोमीति वृथाभिमानः
स्वकर्मसूत्रैर्ग्रथितो हि लोकः ।।

१५. क्षुद्रेऽपि निहिता शक्तिः सम्भावना महीयसी ।
क्षुद्रबीजान्महाकाय-वटवृक्षस्य सम्भवः ।।

१६. भेदभावं परित्यज्य जातिधर्मादिहेतुकम् ।
सहावस्थानमेकत्र कर्त्तव्यं शान्तिकामिभिः ।।

१७. मनस्येकं वचस्येकं कर्मण्येकं महात्मनाम् ।
मनस्यन्यद् वचस्यन्यत् कर्मण्यन्यद् दुरात्मनाम् ।।

१८. दिनान्ते च पिबेद् दुग्धं निशान्ते च पिबेत् पयः ।
भोजनान्ते पिबेत्तक्रं किं वैद्येन प्रयोजनम् ।।

१९. दुर्जनः परिहर्त्तव्यो विद्ययालंकृतोऽपि सन् ।
मणिना भूषितः सर्पः किमसौ न भयङ्करः ।।

२०. शतं विहाय भोक्तव्यं सहस्रं स्नानमाचरेत् ।
लक्षं विहाय दातव्यं कोटिं त्यक्त्वा हरिं भजेत् ।।

२१. मनसा चिन्तितं कर्म वचसा न प्रकाशयेत् ।
अन्यलक्षितकार्यस्य यतः सिद्धिर्न जायते ।।

२२. उत्साहः साहसं धैर्यं बुद्धिः शक्तिः पराक्रमः ।
षडेते यत्र तिष्ठन्ति तत्र देवः सहायकः ।।

२३. उद्योगे नास्ति दारिद्र्यं जपतो नास्ति पातकम् ।
मौनिनः कलहो नास्ति न भयं चास्ति जाग्रतः ।।

२४. क्षमाधनुः करे यस्य दुर्जनः किं करिष्यति ।
अतृणे पतितो वह्निः स्वयमेवोपशाम्यति ।।

२५. यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः ।
यत्रैतास्तु न पूज्यन्ते सर्वास्तत्राफलाः क्रियाः ।।

२६. धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः ।
धीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणम् ।।

२७. मक्षिका व्रणमिच्छन्ति धनमिच्छन्ति पार्थिवाः ।
नीचाः कलहमिच्छन्ति शान्तिमिच्छन्ति साधवः ।।

२८. नास्ति विद्यासमो बन्धुर्नास्ति सत्यसमं तपः ।
नास्ति रोगसमं दुःखं नास्ति त्यागसमं सुखम् ।

## टिप्पणी

पूर्यते - ପୂର୍ଣ୍ଣହୁଏ (पूर्णं भवति) । घटः - ମାଠିଆ (कलसः) । प्रज्ञा - ପରିପକ୍ୱଜ୍ଞାନ (परिपक्वं ज्ञानम्) । हि - ଯେହେତୁ (यतः) । पयः - ଦୁଗ୍ଧ (दुग्धम्) । भुजङ्गानाम् - ସାପମାନଙ୍କର (सर्पाणाम्) । नारिकेलसमाकाराः - ନଡ଼ିଆସଦୃଶ (नारिकेलसदृशाः) । सज्जनाः - ସାଧୁଲୋକମାନେ (साधुजनाः) । वदरिकाकाराः - ବରକୋଳିପରି (वदरिकाफलसदृशाः) । मनोहराः - ସୁନ୍ଦର (रमणीयाः) । मूढाः - ମୂର୍ଖମାନେ (मूर्खाः) । परमन्दिरम् - ଅନ୍ୟ ଘରକୁ (अन्यस्य गृहम्) । लघुतां यान्ति - ଛୋଟ ହୁଅନ୍ତି (हीनाः भवन्ति) । शशी - ଜହ୍ନ (चन्द्रः) । परोपकाराय - ଅନ୍ୟର ଉପକାର ପାଇଁ (अन्यस्य उपकारनिमित्तम्) । नमन्ति - ନଇଁପଡ଼ନ୍ତି (नम्राः भवन्ति) । फलिनः - ଫଳିଥିବା (फलयुक्ताः) । कदाचन - କେବେହେଲେ (कदापि) । इन्धनम् - ଜାଳେଣି (जालेणि इति भाषायाम्) । मलयाचलः

- ମଳୟ ପର୍ବତ (मलयगिरि:) । निर्गन्धा: - ଗନ୍ଧହୀନ (गन्धहीना:) । किंशुका: - ପଳାଶଗଛ (पलाशवृक्षा:) । रोदन - କ୍ରନ୍ଦନ (क्रन्दनम्) । अनृतम् - ମିଛ (मिथ्या / मृषा) । अकृत्यम् - ଅକାର୍ଯ୍ୟ (अकार्यम्) । कृत्यम् - କରଣୀୟ (कार्यम्) । राज्ञाम् - ରାଜାମାନଙ୍କର ((नृपाणाम्) । शुश्रूषा - ସେବା (सेवा) । गुणवताम् - ଗୁଣୀଲୋକମାନଙ୍କର (गुणिजनानाम्) । जहाति - ତ୍ୟାଗକରେ (त्यजति) । पावकस्पृष्ट: - ଅଗ୍ନିସ୍ପୃଷ୍ଟ (अग्निना स्पृष्ट:) । सौरभम् - ସୁବାସ (सुगन्ध:) । परमम् - ଶ୍ରେଷ୍ଠ (श्रेष्ठम्) । यत: - ଯେଣୁ (येन कारणेन) । कुबुद्धि: - ମନ୍ଦବୁଦ୍ଧି (कुत्सिता बुद्धि:) । वृथाभिमान: - ବୃଥା ଅହଙ୍କାର (वृथा गर्व:) । महीयसी - ଶ୍ରେଷ୍ଠ (श्रेष्ठा) । एकत्र - ଏକାଠି (एकस्मिन् स्थाने) । मनसि - ମନରେ (मानसे) । वचसि - କଥାରେ (वचने) । दुरात्मनाम् - ଦୁଷ୍ଟମାନଙ୍କର (खलानाम्) । पय: - ପାଣି (जलम्) । तक्रम् - ଦହି (दधि) । भूषित: - ଅଳଙ୍କୃତ (अलङ्कृत:) । विहाय - ଛାଡ଼ି (त्यक्त्वा) । पराक्रम: - ବୀରତ୍ୱ (वीरत्वम्) । उपशाम्यति - ଲିଭିଯାଏ (उपशान्त: भवति) । पूज्यन्ते - ପୂଜାପା'ନ୍ତି (सम्मानिता: भवन्ति) ।

## अभ्यास:

**1. निजभाषया वाक्यद्वयेन वाक्यत्रयेण वा उत्तरं लिखत ।**

(क) मूढ़ा: केन लघुतां यान्ति ?

(ख) के नमन्ति, के च न नमन्ति ?

(ग) सनातन: धर्म: क: ?

(घ) केषां बलं किम् ?

(ङ) कथं दुर्जन: परिहर्त्तव्य: ?

(च) मनसा चिन्तितं कर्म कथं वचसा न प्रकाशयेत् ?

(छ) के किम् इच्छन्ति ?

(ज) कदा किं पिबेत् ?

(झ) महात्मनां दुरात्मनां च मध्ये क: भेद: ?

(ञ) कथं क्षुद्रेऽपि निहिता शक्ति: सम्भावना महीयसी ?

(ट) सर्वविद्यानां क: क्रम: ?

(ठ) परोपकाराय के किं कुर्वन्ति ?

**2. निजभाषया एकपदात्मकं / अतिसंक्षिप्तम् उत्तरं लिखत ।**

(क) लोकः कैः ग्रथितः ?

(ख) केषामुपदेशः प्रकोपाय भवति ?

(ग) भुजङ्गानां पयः पानं केवलं किं भवति ?

(घ) नारिकेलसमाकाराः के दृश्यन्ते ?

(ङ) परोपकाराय वृक्षाः किं कुर्वन्ति ?

(च) नद्यः परोपकाराय किं कुर्वन्ति ?

(छ) इदं शरीरं किमर्थम् ?

(ज) कीदृशाः वृक्षाः नमन्ति ?

(झ) सज्जनसंगेन कः सज्जनायते ?

(ञ) राजा कस्य बलम् ?

(ट) मूर्खस्य बलम् किम् ?

(ठ) बालानां बलं किम् ?

(ड) कः परमः धर्मः ?

(ढ) परमं सत्यं किम् ?

(ण) मनसा चिन्तितं कर्म केन च प्रकाशयेत् ?

(त) सहस्रं विहाय किमाचरेत् ?

(थ) कोटिं त्यक्त्वा कं भजेत् ?

(द) भोजनान्ते किं पिबेत् ?

**3. सन्धिविच्छेदं कुरुत ।**

नास्ति, व्रणमिच्छन्ति, दमोऽस्तेयम्, नार्यस्तु, स्वयमेव, चास्ति, सिर्द्धिन, स्नानमाचरेत्, मनस्तापम् ।

**4. सन्धिं कुरुत ।**

सम् + भावना, मनसि + एकम्, वचसि + एकम्, क्षुद्रे + अपि, अल्पानाम् + अपि, न + एव, गतः + अपि, बालः + न, दृश्यन्ते + अपि, वहिः + एव ।

**5. वाक्यानि रचयत ।**

अपि, एव, यथा, च, कदाचन, तथा, कर्त्तव्यम्, परम्, यतः, त्यक्त्वा ।

6. **शुद्धम् उत्तरं निरूपयत ।**

(क) के नारिकेलसमाकारा: दृश्यन्ते ?

(i) दुर्जना: (ii) गुरुजना:

(iii) सज्जना: (iv) जना:

(ख) के न नमन्ति ?

(i) वृक्षा: (ii) पुष्पवृक्षा:

(iii) गुणिन: (iv) शुष्कवृक्षा:

(ग) मक्षिका: किमिच्छन्ति ?

(i) धनम् (ii) पुष्परसम्

(iii) व्रणम् (iv) कलहम्

(घ) कियत् विहाय दातव्यम् ?

(i) कोटिम् (ii) लक्षम्

(iii) सहस्रम् (iv) शतम्

(ङ) कदा दुग्धं पिबेत् ?

(i) निशान्ते (ii) भोजनान्ते

(iii) दिनान्ते (iv) शयनान्ते

7. **शून्यस्थानानि पूरयत । (कोष्ठकात्)**

(क) पार्थिवा: ______________ इच्छन्ति ।

(ख) ______________ कलहो नास्ति ।

(ग) किं ______________ प्रयोजनम् ।

(घ) ______________ गुणवतां बलम् ।

(ङ) परोपकाराय वहन्ति ______________ ।

मौनिन:, क्षमा, नद्य:, धनम्, वैद्येन

●●●

# प्रहेलिका:

*(संस्कृतभाषासाहित्यं सुसमृद्धम् । ऋषिपरम्परातः आरभ्य आधुनिकसाहित्यं यावत् इयं धारा विविधरूपेण प्रभवति । कदाचित् मन्त्ररूपेण निबन्धरूपेण संहितारूपेण नाटकरूपेण कविताकारेण अथवा प्रहेलिकारूपेण इयं सर्वान् रञ्जयति । संस्कृतसाहित्ये अनेकाः प्रहेलिकाः कूटश्लोकाश्च दृश्यन्ते, विद्यार्थिनां मनोरञ्जनाय काश्चन अत्र प्रदत्ताः ।)*

पर्वताग्रे रथो याति भूमौ तिष्ठति सारथिः ।
चलते वायुवेगेन पदमेकं न गच्छति ।।१।।

अनेकसुषीरं वाद्यं कान्तं च ऋषिसंज्ञितम् ।
चक्रिणा च सदाराध्यं यो जानाति स पण्डितः ।।२।।

एकश्चक्षुर्न काकोऽयं बिलमिच्छन्न पन्नगः ।
क्षीयते वर्धते चैव न समुद्रः न चन्द्रमाः ।।३।।

अस्थि नास्ति शिरो नास्ति बाहुरस्ति निरङ्गुलिः ।
नास्ति पादद्वयं गाढमङ्गमालिङ्गति स्वयम् ।।४।।

नरनारीसमुत्पन्ना सा स्त्री देहविवर्जिता ।
अमुखी कुरुते शब्दं जातमात्रा विनश्यति ।।५।।

अर्धचन्द्रसमायुक्तं पुंनाम चतुरक्षरम् ।
ककारादि लकारान्तमिह जानाति पण्डितः ।।६।।

दन्तैर्हीनः शिलाभक्षी निर्जीवो बहुभाषकः ।
गुणस्यूतिसमृद्धोऽपि परपादेन गच्छति ।।७।।

न तस्यादिर्न तस्यान्तो मध्ये यस्तस्य तिष्ठति ।
तवाप्यस्ति ममाप्यस्ति यदि जानासि तद् वद ।।८।।

वृक्षाग्रवासी न च पक्षिराज-
स्त्रिनेत्रधारी न च शूलपाणिः ।
त्वग्वस्त्रधारी न च सिद्धयोगी
जलं च बिभ्रन्न घटो न मेघः ।।९।।

श्यामं च वर्त्तुलाकारं पुंनाम चतुरक्षरम् ।
शकारादि मकारान्तं यो जानाति स पण्डितः ।।१०।।

कृष्णमुखी च गौराङ्गी सदा पेटिकावासिनी ।
अग्निं वमति शीघ्रं हि पेटिकया प्रघर्षिता ।।११।।

गोपालो नैव गोपालः त्रिशूली नैव शङ्करः ।
चक्रपाणिः स नो विष्णुः यो जानाति स पण्डितः ।।१२।।

युधिष्ठिरस्य या कन्या नकुलेन विवाहिता ।
पूजिता सहदेवेन सा कन्या वरदास्तु मे ।१३।

हतो हनुमताऽऽरामः सीता हर्षमुपागता ।
रुदन्ति राक्षसाः सर्वे हाऽऽराम ! हाऽऽराम ! तदा ।१४।

केशवं पतितं दृष्ट्वा द्रोणः हर्षमुपागतः ।
क्रन्दन्ति कौरवाः सर्वे हा केशव हा केशव ।१५।

## अर्थाः

१. पर्वतस्य (पाषाणस्य) उपरि रथः चलति । रथस्य चालकः सारथिः भूमौ तिष्ठति । रथः वायुवेगेन अर्थात् क्षिप्रं चलति । किन्तु एकमपि पदम् अग्रे न सरति । (कुरालचक्रम्)

२. अत्र अनेकानि बिलानि भवन्ति । अस्य प्रथमाक्षरं 'व' कारो भवति । एकस्य ऋषेः नाम बोधयति । सर्पाः सदैव अत्र निवसन्ति । एनं यः वेत्ति असौ नूनमेव विद्वान् भवति । (वल्मीकः)

३. अस्य एकमेव नेत्रं परन्तु अयं न काकः । बिले प्रविशति किन्तु सर्पो न भवति । कदाचित् क्षीणं भवति कदाचित् वृद्धिं प्राप्नोति परन्तु सागरो न भवति, चन्द्रोऽपि न भवति । (सूचीसूत्रम्)

४. अस्य अस्थीनि न सन्ति । अत्रापि मस्तकं नास्ति । बाहुद्वयमस्ति । किन्तु अङ्गुल्यः न सन्ति । पादद्वयं न वर्त्तते किन्तु कमपि जनं गाढम् आलिङ्गति स्वयमेव । (युतकम्)

५. एषा एका नारी । कदाचित् इमां पुरुषः जनयति कदाचित् च नारी । अस्याः शरीरं नास्ति । मुखं विना इयं शब्दं करोति । किन्तु जातमात्रेण नष्टा भवति । (छोटिका) फुट्की इति भाषायाम्

६. अर्धचन्द्रेण सह अयं युक्तो भवति । पुंलिङ्गे अस्य व्यवहारो भवति । अत्र नाम्नि चत्वारि अक्षराणि सन्ति । अस्य आद्यक्षरं 'क' कारो भवति । अन्ते 'ल'कार एव तिष्ठति । एनं यः जानाति सः विद्वान् भवति । (करतालः)

७. अस्य दन्ताः न सन्ति तथापि कदाचित् लघुपाषणानि लोष्ट्राणि च भक्षयति । अस्य प्राणाः न सन्ति । परन्तु बहुविधं शब्दं करोति । अनेकैः गुणैः अयं युक्तः । किन्तु अपरस्य पादेन सः चलति । अयं कः ? (उपानत्)

८. अस्य आद्यक्षरं 'न' कारो भवति । अन्त्याक्षरमपि 'न'कारः एव । एतत् मम अस्ति तव समीपे अपि अस्ति । यदि एतत् त्वं जानासि तर्हि कथय । (नयनम्)

९. वृक्षस्य अग्रे वसति । सः पक्षिराजः न भवति । तस्य त्रीणि नेत्राणि सन्ति परन्तु सः भगवान् शङ्करः न भवति । एतत् कदा त्वग्वस्त्रम् एव धरति परन्तु सन्न्यासी न भवति । अन्तः जलं तिष्ठति परन्तु मेघो न भवति घटोऽपि न भवति । (नारिकेलः)

१०. अस्य वर्णः श्यामः । आकृत्या वर्त्तुलाकारः । पुंलिंगे व्यवहारः । अत्र चत्वारि अक्षराणि सन्ति । 'श'कारः आद्यक्षरं भवति । 'म'कारः अन्ते राजते । इमं यः जानाति असौ अवश्यमेव पण्डितपदं प्राप्नोति । (शालग्रामः)

११. अस्याः मुखं कृष्णवर्णं भवति । शरीरस्य वर्णः शुभ्रः दृश्यते । सर्वदा पेटिकामध्ये निवसति । यदा पेटिकया सह अस्याः घर्षणं भवति सदा केवलम् अग्निं वमति । (अग्निशलाका)

१२. गवां पालकोऽयं परन्तु गोपालः (श्रीकृष्णः) न भवति । अयं त्रिशूलधारि- शङ्करं वहति परन्तु स्वयं शङ्करः न भवति । अस्य करे (पाणौ) चक्रमस्ति किन्तु भगवान् विष्णुः न भवति । एनं यो जानाति सः निश्चयेन पण्डितः एव भवति । (वृषभः)

१३. युधिष्ठिरस्य (हिमालयस्य) या पुत्री नकुलेन (शिवेन) विवाहं कृतवती देवेन (देवगणेन) सह सर्वदा पूजिता (अस्ति) सा कन्या (सर्वमङ्गला पार्वती) मे (मम कृते) वरदा (वरदात्री) भवतु । (पार्वती)

१४. हनुमता आरामः (अशोकवनम्) हतः, ततः सीता हर्षम् (आनन्दम्) उपागता (अनुभूतवती), तदा सर्वे राक्षसाः हा आराम ! हा ! आराम ! (इति कथयन्तः) रोदनं कुर्वन्ति (स्म)

१५. के (जले) शवं पतितं दृष्ट्वा द्रोणः (कृष्णकाकः) हर्षम् उपागतः (अनुभूतवान्) । सर्वे कौरवाः (शृगालाः) हा के (जले) शव के (जले) शव इति क्रन्दन्ति ।

## अभ्यासः

**1. निजभाषया अधोलिखितानां श्लोकानां वाक्यद्वयेन वाक्यत्रयेण वा अर्थं लिखत ।**

(क) अनेकसुषीरं वाद्यं कान्तं च ऋषिसञ्ज्ञितम् ।
चक्रिणा च सदाराध्यं यो जानाति च पण्डितः ।।

(ख) अस्थि नास्ति शिरो नास्ति बाहुरस्ति निरङ्गुलिः ।
नास्ति पादद्वयं गाढमङ्गमालिङ्गति स्वयम् ।।

(ग) अर्धचन्द्रसमायुक्तं पुंनाम चतुराक्षरम् ।
ककारादि लकारान्तमिह जानाति पण्डितः ।।

(घ) युधिष्ठिरस्य या कन्या नकुलेन विवाहिता
पूजिता सहदेवेन सा कन्या वरदास्तु मे ।।

(ङ) श्यामं च वर्त्तुलाकारं पुंनाम चतुरक्षरम् ।
शकारादि मकारान्तं यो जानाति स पण्डितः ।।

2. **निजभाषया एकपदात्मकं / अतिसंक्षिप्तम् उत्तरं लिखत ।**

(क) किं चक्रिणा सदाराध्यं भवति ?

(ख) का सा स्त्री देहविवर्जिता ?

(ग) का सहदेवेन पूजिता ?

(घ) किं त्वग्वस्त्रधारी न च सिद्धयोगी ?

(ङ) कृष्णमुखी का सा गौराङ्गी या सदा पेटिकावासिनी ?

(च) का अमुखी कुरुते शब्दम् ?

(छ) कः त्रिनेत्रधारी न च शूलपाणिः ?

(ज) कस्य पादद्वयं नास्ति परं गाढमालिङ्गति ?

(झ) का वने याता वने च त्यक्ता ?

3. **सन्धिविच्छेदं कुरुत ।**

साक्षरो न, यो जानाति, सदाराध्यम्, काकोऽयम्, चैव, नास्ति, बाहुरस्ति, गाढमालिङ्गति ।

4. **सन्धिं कुरुत ।**

बिभ्रत् + न, हर्षम् + उपागतः, चतुः + अक्षरम्, तव + अपि + अस्ति, मम + अपि + अस्ति । दन्तैः + हीनः । पदम् + एकम् । न + एव । रथः + याति । पर्वत + अग्रे ।

5. **वाक्यानि रचयत ।**

अपि, एव, एवम्, हि, सदा, यदि, तद्, कुरुते, स्वयम्, अस्ति ।

●●●

# समयगीतिका

*कविः डॉ. हरेकृष्णमेहेरः ओडिशाराज्यस्य नूआपडाजिल्लान्तर्गते सिनापालिग्रामे कविपरम्परावाहिनि वंशे लब्धजन्मा । विविधभाषासु कृतविद्यः मौलिकलेखकः सफलानुवादकश्च । विविधसम्मानैः सम्मानितः अयं कविः समग्रराज्ये देशे च सुपरिचितः । प्रस्तुता कविता तत्प्रणीतात् मातृगीतिकाञ्जलिः इति गीतिकाव्यात् आनीता ।*

समय ! नमस्ते, समय ! नमस्ते,
आत्मवशे ते
सकलं शेते
विपुलं विश्वं नमयसि हस्ते ।
समय ! नमस्ते
समय ! नमस्ते ।। (ध्रुवम्)

विहित-वहित्रे
वीचि-विचित्रे
दुस्तर-भव-जलनिधौ निकामम्,
भवतो लीला
विलोल-शीला
प्रबलं चलति नियतमविरामम् ।
अप्रतिबन्धो जगद्भ्रमस्ते ।
समय ! नमस्ते
समय ! नमस्ते ।। (१)

तव रमणीया
गति-रमणी या
विहरति सरल-तरल-सुविकारा,
लास्य-विलासा
हास्य-सुरासा
वरण-हरण-कारण-सुख-कारा ।
विषमः सुषमः सुविभ्रमस्ते ।
समय ! नमस्ते
समय ! नमस्ते ।।(२)

ऋद्धं निःस्वं
निखिल-खनिः स्वं
नितरां वितरसि किमपि रसालम्,
क्वचिदपि दीपं
तमःप्रतीपं
रूपं सौम्य-कराल-विशालम् ।
द्वन्द्वमयोऽयं किल नियमस्ते ।
समय ! नमस्ते
समय ! नमस्ते ।। (३)

भुवि भवदीया
वहति नदी या
प्रखराऽधीरा क्षणमय-धारा,
विरहं विधुरं
मिलनं मधुरं
तनुते वासर-रजनी-पारा ।
न कोऽपि रोद्धुं रयं क्षमस्ते ।
समय ! नमस्ते
समय ! नमस्ते ।।(४)

क्वचिदुत्कर्षं
क्वचिदपकर्षं
चित्रं रचयति भवतश्चक्रम्,
अबलं सबलं
शुष्कं सजलं
स्वैरं कुरुते सरलं वक्रम् ।
अलङ्घनीयो नय-क्रमस्ते ।
समय ! नमस्ते
समय ! नमस्ते ।।(५)

भूत-भविष्यत्
साम्प्रतिकं यत्
प्रसृतं तव हि वितान-समस्तम्,
स्मृतिपथमयते
विधौ समय ! ते
सुचिरं चराचरं गतमस्तम् ।
अगम्य-महिमा गगन-समस्ते ।
समय ! नमस्ते
समय ! नमस्ते ।। (६)

विश्व-नियन्ता
त्वमिह निहन्ता
बहुविध-कर्माकर्म-विधाता,
त्वयि चिर-दास्यं
नूनमुपास्यं
मौनी त्वं निर्मम-निर्माता ।
प्रसरतु सुतरां शुभ-धर्मस्ते ।
समय ! नमस्ते
समय ! नमस्ते ।।(७)

## टिप्पणी

नमस्ते - ତୁମକୁ ନମସ୍କାର (नमः + ते (प्रणामः)) । आत्मवशे - ନିଜ ଅଧିନରେ (निजवशे) । सकलम् - ସବୁ (समस्तम्) । विश्वम् - ପୃଥିବୀ (पृथिवी) । विपुलम् - ବିସ୍ତାରିତ (विस्तीर्णम्) । वहित्रे - ଡଙ୍ଗାରେ (नौकायाम्) । वीचिः - ତରଙ୍ଗ (तरङ्गः) । जलनिधौ - ସମୁଦ୍ରରେ (सागरे) । निकामम् - ଅତ୍ୟନ୍ତ (अत्यन्तम्) । विलोलशीला- ଚଞ୍ଚଳସ୍ୱଭାବ (विलोलं शीलं यस्याःसा) । अप्रतिबन्ध - ବାଧାରହିତ (बाधारहित) । रमणीया - ସୁନ୍ଦର (मनोरमा) । सुविकारा- ଉତ୍ତମବିକାରଯୁକ୍ତ (उत्तमविकारयुक्ता) । सुविभ्रमः - ଅଙ୍ଗଭଙ୍ଗୀ (सुविलासः / अङ्गभङ्गी) । क्वचित्- କୌଣସି ସ୍ଥାନରେ (कुत्रचित्) । प्रतीपम् - ବିପରୀତ (विपरीतम्) । करालः- ଭୟଙ୍କର (भयङ्करः) ।

## अभ्यासः

**1. निजभाषया वाक्यद्वयेन वाक्यत्रयेण वा उत्तरं लिखत ।**

(क) समयस्य विभिन्नरूपतां वर्णयत ।

(ख) मानवजीवने उत्थानपतनादिकं कथं समयस्य वशीभूतम् ?

(ग) समयस्य वितानः कः ?

(घ) का गतिः ? सा केन रूपेण चित्रिता ?

(ङ) समयः कथं निर्ममनिर्माता ?

**2. निजभाषया एकपदात्मकं / अतिसंक्षिप्तम् उत्तरं लिखत ।**

(क) समयनदी कीदृशी ?

(ख) समयस्य लीला कीदृशी ?

(ग) का समयस्य गतिः ?

(घ) समयस्य गतिः केन रूपेण चित्रिता ?

(ङ) समयस्य नियमः कीदृशः ?

(च) नद्याः पारद्वयं किम् ?

(छ) समयचक्रं किं रचयति ?

(ज) समयस्य महिमा कीदृशः ?

(झ) समयस्य सर्वे कथं दास्यं गताः ?

(ञ) कथं चराचरं समयेन अस्तं याति ?

**3. सन्धिविच्छेदं कुरुत ।**

नमस्ते, दुस्तर, नियतमविरामम्, भ्रमस्ते, सुविभ्रमस्ते

**4. सन्धिं कुरुत ।**

क्वचित् + अपि, द्वन्दमयः + अयम्, नियमः + ते, प्रखरा + अधीरा, कः + अपि, क्षमः + ते, क्वचित् + उत्कर्षम्, क्वचित् + अपकर्षम्, त्वम् + इह, नूनम् + उपास्यम् ।

**5. वाक्यानि रचयत ।**

ते, चलति, तव, या, नितराम्, किल, अयम्, विशालम्, मधुरम्, वहति ।

●●●

# वसुमती

*डॉ. मनोमोहन-आचार्य-प्रणीतस्य गीतमिलिन्द-- काव्यस्य एकादश-गुञ्जनतः समुद्धृता कवितेयम् । गीतमिदं मोहनरागेण गेयम् ।*

श्यामल-मुञ्ज-निकुञ्ज-वसुमती नीलकमल-ललिता,
छिन्न-वनस्पति-कुन्तलकान्तिः भारनता लुलिता ।०।

कालिय-वर्ज्य-गरल-रसपाना,
निर्मल-तटिनी मलपरिधाना,
जीवनयमुना खेदनिवहना, विषरस-
दानरता । श्यामल-मुञ्ज-निकुञ्ज-
वसुमती....................लुलिता ।१।

गन्धक-पाक्य-कदम्ल-निकाशाः
धीरसमीराः हारितहासाः ।
निर्झरवहनाः सौरभगहनाः, मधुवाताः
पिहिताः श्यामल-मुञ्ज-निकुञ्ज-
वसुमती..................लुलिता ।२।

यन्त्र-पुतनिका-स्तनरसपीनः
क्षीरमहोदधिरवशो दीनः ।
दूषितसलिला, वसुधा
सन्ततमजगरगर्भगता । श्यामल-मुञ्ज-
निकुञ्ज-वसुमती.........लुलिता ।३।

तनय-कर-परशु-भिन्न-तरुततिः
रोदिति घनवनरेणु-वसुमती ।
कल्पवटी या श्यामलशस्या नितरां
धूसरिता । श्यामल-मुञ्ज-निकुञ्ज-
वसुमती ....................लुलिता ।४।

आणव-शक्ति-परीक्षणशाला,
पुष्कर-वेदी धूमकपाला ।
तारकहारा, निर्मलधारा कल्मषकर्दमिता ।
श्यामल-मुञ्ज-निकुञ्ज-वसुमती......लुलिता ।६।

वाम-कामशर-भिन्न-विदीर्णा
जारित-वायु-जरायु-सुवर्मा ।
क्रुद्ध-दिवाकर-पाटल-तीक्ष्णैः शुष्का प्राणलता ।
श्यामल-मुञ्ज-निकुञ्ज-वसुमती......लुलिता ।७।

## अभ्यासः

**1. निजभाषया वाक्यद्वयेन वाक्यत्रयेण वा उत्तरं लिखत ।**

(क) वसुमती पूर्वं कीदृशी आसीत्, सम्प्रति कीदृशी सञ्जाता ?
(ख) जीवन-यमुना किमर्थं खेदनिवहना भवति ?
(ग) मधुवाताः कथं पिहिताः ?
(घ) क्षीरमहोदधिः किमर्थम् अवशो दीनः ?
(ङ) श्यामलसस्या वसुमती कस्माद् हेतोः धूसरिता सञ्जाता ?
(च) पुष्करवेदी कथं कल्मष-कर्दमिता ?
(छ) प्राणलता कथं शुष्का जाता ?

**2. निजभाषया संस्कृत-भाषया वा एकपदात्मकं / अतिसंक्षिप्तम् उत्तरं लिखत ।**

(क) का लुलिता सञ्जाता ?
(ख) का विषरस-दानरता ?
(ग) के हारित-हासाः ?
(घ) का आणव-शक्ति-परीक्षण-शाला जाता ?

**3. सन्धिविच्छेदं कुरुत ।**

महोदधिरवशः, सन्ततमजगरगर्भगता

**4. सन्धिं कुरुत ।**

तीक्ष्णैः + शुष्का । वनः + पतिः । क्षीरमहोदधिः + अवशः ।

**5. वाक्यानि रचयत ।**

वसुमती, नीलकमलललिता, धीरसमीराः, रोदिति, शुष्का

●●●

# अनुच्छेदविभाग:

## प्रथम: अनुच्छेद:

अस्ति कश्चित् विदूषक: । तस्य परिहासेन नृप: सदैव हसति । एकदा विदूषक: चिन्तयति - मम परिहासेन प्रतिदिनं सकला: जना: हसन्ति । तथापि न कोऽपि जन: मां महापुरुष: इति कथयति । भवतु, अधुना सेनापतिपदं प्राप्तव्यम् । विदूषक: राजानं वदति- महाराज ! इच्छामि सेनापतिपदम् । राजा भाषते– तथास्तु । तदा विदूषक: नृपं खड्गं याचते । परिहासेन नृप: विदूषकाय दीर्घं खड्गं ददाति । तदा विदूषक: मोदते । स: खड्गं धृत्वा चलति । नृप: तं पृच्छति - कुत्र गच्छन्ति महाभागा: ? विदूषक: वदति - सैन्यसकाशं गच्छामि ।

## प्रश्ना:

**1. एकेन वाक्येन संस्कृतभाषया मातृभाषया वा उत्तरं लिखत ।**

(क) कस्य परिहासेन नृप: सदैव हसति ?

(ख) नृप: विदूषकं किं पृच्छति ?

(ग) विदूषक: नृपं किं वदति ?

**2. एकेन वाक्येन संस्कृतभाषया मातृभाषया वा उत्तरं लिखत ।**

(क) विदूषकस्य परिहासेन सकला: जना: किं कुर्वन्ति ?

(ख) अधुना विदूषकेण किं पदं प्राप्तव्यम् ?

(ग) परिहासेन राजा विदूषकाय किं ददाति ?

(घ) खड्गं प्राप्य क: मोदते ?

●●●

## द्वितीयः अनुच्छेदः

भारतमस्माकं प्रियदेशः । एषः देशः देशानां शिरोमणिः खलु । अस्य प्राकृतिकं सौन्दर्य्यं बलवत् मनः मोहयति । अस्य उत्तरस्यां दिशि पर्वतराजः हिमालयः विराजते । एषः पर्वतः भारतस्य प्रहरी खलु । भारतस्य दक्षिणेन महासागरः अस्य चरणं प्रक्षालयति । अस्य अङ्के अनेकाः नद्यः प्रवहन्ति । एतासां तटेषु पवित्राणि नगराणि विराजन्ते । नद्यः लोकमातरः भवन्ति । भारतस्य हरितानि वनानि अस्य शोभां वर्धयन्ति । प्राचीनकाले अस्माकं देशः अन्यदेशानां गुरुः मन्यते स्म । अत्र नालन्दा-तक्षशिला–नवद्वीपप्रभृतयः अनेके प्रख्याताः विश्वविद्यालयाः आसन् । वैदेशिकाः उच्चशिक्षार्थम् अत्रागत्य विद्यामर्जयन्ति स्म । धर्मशास्त्रकारेण मनुना समुचितमुक्तम्-

एतद्देशप्रसूतस्य सकाशादग्रजन्मनः ।<br>
स्वं स्वं चरित्रं शिक्षेरन् पृथिव्याः सर्वमानवाः ।।

### प्रश्नाः

**1. एकेन वाक्येन संस्कृतभाषया मातृभाषया वा उत्तरं लिखत ।**

(क) कः देशः देशानां शिरोमणिः ?

(ख) भारतस्य संबन्धे धर्मशास्त्रकारेण मनुना किमुक्तम् ?

(ग) भारतवर्षे के प्राचीनाः विश्वविद्यालयाः आसन् ?

**2. एकेन पदेन संस्कृतभाषया मातृभाषया वा उत्तरं लिखत ।**

(क) भारतस्य प्राकृतिकं सौन्दर्यं किं मोहयति ?

(ख) भारतस्य उत्तरस्यां दिशि कः विराजते ?

(ग) नदीनां तटेषु कीदृशानि नगराणि विराजन्ते ?

(घ) काः लोकमातरः भवन्ति ?

●●●

## तृतीयः अनुच्छेदः

परिवारस्य समाजस्य विद्यालयस्य संविधानस्य संसदः सेनायाः चापि केचन नियमाः सन्ति । एतेषां नियमानां परिपालनम् अनुशासनमिति कथ्यते । सकला सृष्टिः अनुशासनमनुसरति । सूर्यः चन्द्रः तारकाः च नियमितसमये प्रकटीभूय अनुशासनस्य परिचयं प्रयच्छन्ति । ऋतवः एकस्मिन् मासे एव नायान्ति । ते भिन्न-मासेषु आयान्ति । गुरूणामाज्ञापालनं वृद्धानां सेवाकरणं विपत्तौ सहायताप्रदानम् इत्यादयः परिवारस्य नियमाः भवन्ति । एतेषां नियमानां परिपालनेन परिवारे आनन्दस्य वातावरणं तिष्ठति । राजमार्गस्य वामतः चलनं, यात्रापत्रग्रहणसमये पंक्तौ स्थितिः, चतुष्पथेषु मार्गनियामक-आरक्षिणां संकेतस्यानुसरणं पीडितानां सहायताकरणम् इत्यादयः समाजस्य नियमाः भवन्ति । एषां परिपालनेन समाजे शान्तिः विराजते ।

### प्रश्नाः

**1. एकेन वाक्येन संस्कृतभाषया मातृभाषया वा उत्तरं लिखत ।**

(क) किं नाम अनुशासनम् ?

(ख) के अनुशासनस्य परिचयं प्रयच्छन्ति ?

(ग) परिवारस्य के नियमाः भवन्ति ?

**2. एकेन पदेन संस्कृतभाषया मातृभाषया वा उत्तरं लिखत ।**

(क) सकला सृष्टिः किमनुसरति ?

(ख) एकस्मिन् मासे के न आयान्ति ?

(ग) यात्रापत्रग्रहणसमये कुत्र स्थातव्यम् ?

(घ) गुरूणामाज्ञापालनं कस्य नियमो भवति ?

●●●

## चतुर्थः अनुच्छेदः

समाजे केचन जनाः नारीशिक्षायाः विरोधिनः भवन्ति । तेषां मतानुसारेण नारीशिक्षया समाजे धर्मस्य संस्कृतेः च विनाशः भवति । शिक्षां गृहीत्वा नार्यः निरङ्कुशाः जायन्ते । अनेन समाजस्य नैतिकमूल्यानि अधोगतिं प्रप्नुवन्ति । समाजस्य विकाशाय नारीशिक्षा नितान्तमावश्यकी । पुरुषः शिक्षितः भवति चेत् कश्चित् एकः शिक्षितो भवति । किन्तु नारीशिक्षाद्वारा परिवारः शिक्षितो भवति । पुरुषः स्त्री च गृहशकटस्य द्वे चक्रे स्तः । द्वयोः चक्रयोः दृढतायामेव गृहशकटस्य चालनं सुचारुरूपेण भवितुं शक्नोति । एतयोः चक्रयोः दृढता मुख्यरूपेण शिक्षामाश्रिता । शिक्षिताः नार्यः गृहस्य संचालनम् अधिकदक्षतया कुर्वन्ति । धनस्य सदुपयोगं ताः सुष्ठु कर्त्तुं जानन्ति । अधुना नारीशक्तीकरणयोजना सर्वकारपक्षतः प्रचलति । शास्त्रेषु अपि लिखितमस्ति-

''यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः ।।''

### प्रश्नाः

**1. एकेन वाक्येन संस्कृतभाषया मातृभाषया वा उत्तरं लिखत ।**

(क) नारीशिक्षाविरोधिनां मतं किम् ?

(ख) गृहशकटस्य के द्वे चक्रे ?

(ग) शास्त्रेषु किं लिखितमस्ति ?

**2. एकेन पदेन संस्कृतभाषया मातृभाषया वा उत्तरं लिखत ।**

(क) कस्य विकाशाय नारीशिक्षा आवश्यकी ?

(ख) परिवारः केन शिक्षितो भवति ?

(ग) काः धनस्य सदुपयोगं कुर्वन्ति ?

(घ) सर्वकारपक्षतः का योजना प्रचलति ?

●●●

## पञ्चमः अनुच्छेदः

संस्कृतभाषा प्राचीनभाषासु एकतमा । वेदाः विश्वस्य प्राचीनतमाः उपलब्धाः ग्रन्थाः । एते संस्कृत-भाषायामेव सन्ति । अस्माकं संस्कृतिः संस्कृतमाश्रिता । कथितमस्ति संस्कृतं विना संस्कृतिः पङ्गुः । संस्कृतिं विना ज्ञानिजनः अन्धः । संस्कृतभाषा अनेकासां भाषाणां जननी । पालि-प्राकृत-अपभ्रंशप्रभृतयः भाषाः संस्कृतभाषया एव विकसिताः । आधुनिक-भारतीयभाषाणां विकासः संस्कृतभाषया एव भवति । संस्कृते नूतनशब्दानां निर्माणे अनुपमा क्षमता विद्यते । आधुनिकभाषाणां शब्दकोशस्य संवर्धनाय संस्कृतस्य ज्ञानमनिवार्यम् । देशे भावात्मक-ऐक्याय संस्कृतं परमावश्यकम् । संस्कृतशिक्षाविषये श्रीमाता कथयति- शिक्षायाः माध्यमं स्यात् मातृभाषा राष्ट्रभाषा भवेत् सरलं संस्कृतम् । अन्ताराष्ट्रियभाषा तु स्यात् संप्रति आङ्गलभाषा ।

### प्रश्नाः

**1. एकेन वाक्येन संस्कृतभाषया मातृभाषया वा उत्तरं लिखत ।**

(क) शिक्षायाः माध्यमं किं भवेत् - इति श्रीमाता कथितवती ?

(ख) संस्कृतभाषया काः भाषाः विकसिताः ?

(ग) आधुनिकभारतीयभाषाणां विकासः कया भाषया भवति ?

**2. एकेन पदेन संस्कृतभाषया मातृभाषया वा उत्तरं लिखत ।**

(क) वेदाः कस्यां भाषायां सन्ति ?

(ख) संस्कृतं विना का पङ्गुः ?

(ग) अनेकासां भाषाणां जननी का ?

(घ) किमर्थं संस्कृतं परमावश्यकम् ?

●●●

## षष्ठः अनुच्छेदः

श्रीमद्भगवद्गीता वस्तुतः महाभारतस्य अंशः अस्ति । अर्जुनः युद्धे आत्मीयान् विलोक्य युद्धविमुखः अभवत् । तदा भगवान् श्रीकृष्णः अर्जुनम् उपदिशति स्म । भगवतः श्रीकृष्णस्य उपदेशस्य नाम श्रीमद्भगवद्-गीता । श्रीमद्भगवद्गीता उपनिषदां सारः भवति । अत्र अनेके विषयाः वर्णिताः सन्ति । प्राधान्येन अस्यां भक्तियोगस्य ज्ञानयोगस्य कर्मयोगस्य च प्रतिपादनं कृतम् । अत्र भगवद्गीतायां भक्तिज्ञानकर्मयोगानां त्रिवेणी प्रवहति । अतः प्रसिद्धं कथनं वर्त्तते-

''गीता सुगीता कर्त्तव्या किमन्यैः शास्त्रविस्तरैः ।''

प्रत्येकं मानवः सुखं कामयते । सुखं प्राप्तुं त्रयः मार्गाः निर्दिष्टाः सन्ति- भक्तिः ज्ञानं कर्म च । अतः भक्तः ज्ञानी कर्मशीलः प्रत्येकं मानवः श्रीमद्भगवद्गीतायाः अध्ययनेन कल्याणं कर्त्तुं शक्नोति । एषु त्रिषु मार्गेषु अपि कर्मयोगः आधुनिकयुगे सुतरां कल्याणं करोति । कर्मयोगः जीवने संघर्षस्य उपदेशं प्रयच्छति । कर्म मानवस्य धर्मः । परं कर्म तदेव कल्याणकरं यस्मिन् फलस्य इच्छा न भवेत् । भगवान् श्रीकृष्णः स्पष्टम् उक्तवान्-

कर्मण्येवाधिकारस्ते मा फलेषु कदाचन ।

### प्रश्नाः

**1. एकेन वाक्येन संस्कृतभाषया मातृभाषया वा उत्तरं लिखत ।**

(क) श्रीकृष्णः स्पष्टं किमुक्तवान् ?

(ख) आधुनिकयुगे किं कल्याणकरम् ?

(ग) गीतायां का त्रिवेणी प्रवहति ?

**2. एकेन पदेन संस्कृतभाषया मातृभाषया वा उत्तरं लिखत ।**

(क) प्रत्येकं जनः किं कामयते ?

(ख) युद्धे अर्जुनः कान् दृष्ट्वा युद्धविमुखः अभवत् ?

(ग) का उपनिषदां सारः अस्ति ?

(घ) कः मानवस्य धर्मः ?

●●●

## सप्तमः अनुच्छेदः

अस्मान् परितः यत् अस्ति, तदेव परिवेशः । विशेषतः अरण्य-जल-पवनप्रभृतयः प्राकृतिक- परिवेशस्य मूलम् । सम्प्रति जनसंख्यायाः वृद्धेः कारणात् परिवेशः दूषितः भवति इति परिवेशविशेषज्ञाः वदन्ति । निरक्षरता, अविवेकिता, स्वार्थपरता च परिवेशप्रदूषणस्य मुख्यकारणम् । पुरा जनाः वृक्षच्छेदनं पापमिति अचिन्तयन् । अतः जनाः आम्र-विल्व-पनस-वट-पिप्पलप्रभृतीन् वृक्षान् अपूजयन् । जले वरुणदेवः निवसति इति ज्ञानेन तत्र आवर्जनादिकं न अक्षिपन् । सम्प्रति मानवाः धनोपार्जनाय बहुसंख्यकानि शिल्पागाराणि स्थापयन्ति । फलतः तेभ्यः शिल्पागारेभ्यः निर्गतः धूमराशिः वायुमण्डलं दूषयति । वृक्षच्छेदनम् इदानीन्तनानां मानवानां दैनन्दिनं कर्म भवति । वृक्षः अङ्गारकाम्लं नीत्वा अम्लजानं त्यजति । अम्लजानस्य ग्रहणं कृत्वा जीवाः जीवन्ति । अरण्यं वृष्टेः नियन्त्रणं करोति । अतः अरण्यम् एव जीवनम् । अरण्यस्य सुरक्षया जीवनस्य रक्षा भवति । निजगृहस्य परिवेशः यदि सुन्दरः भविष्यति तर्हि विश्वस्य परिवेशः अपि हसिष्यति । अतः सर्वे स्व गृहवाटिकायामेकम् एकं वृक्षं रोपयन्तु तस्य यत्नं नयन्तु च । तेन परिवेशस्य सुरक्षा भविष्यति ।

### प्रश्नाः

**1. एकेन वाक्येन संस्कृतभाषया मातृभाषया वा उत्तरं लिखत ।**

(क) विश्वस्य परिवेशः केन प्रकारेण हसिष्यति ?

(ख) वायुमण्डलं किं दूषयति ?

(ग) परिवेशप्रदूषणस्य मुख्यकारणं किम् ?

**2. एकेन पदेन संस्कृतभाषया मातृभाषया वा उत्तरं लिखत ।**

(क) पुरा जनाः किं पापमिति अचिन्तयन् ?

(ख) जले कः देवः निवसति ?

(ग) जीवाः किं गृहीत्वा जीवन्ति ?

(घ) अरण्यं कस्य नियन्त्रणं करोति ?

●●●

## अष्टमः अनुच्छेदः

ढेङ्कानालजिल्लायाः नीलकण्ठपुरग्रामे एकः नाविकः आसीत् । नाविकस्य एकः पुत्रः अभवत् । पुत्रस्य नाम बाजिराउतः । बाल्यात् बाजिः पितरि मातरि च भक्तिं करोति । लोकानां दुःखं पितुः शृणोति । दुःखस्य कारणं च पितरं पृच्छति । पिता सर्वदा उपदिशति - 'वत्स ! देशस्य स्वाधीनतां रक्षेत् । स्वाधीनतायाः रक्षणाय प्राणान् अपि त्यजेत् । कर्त्तव्यं पालयेत् । अत्याचारस्य विरोधं कुर्यात् । तदा स्वराज्याय आन्दोलनम् अचलत् । प्रजामण्डलस्य नेतारः शासकानाम् अत्याचारविषये ग्रामे ग्रामे लोकान् अबोधयन् । बहवः श्रोतारः सभास्थलं गच्छन्ति । बाजिः अपि मात्रा पित्रा च सह गच्छति । नेतृणां भाषणं शृणोति । क्रमेण सः नेतृभिः प्रभावितः अभवत् । भारतमातुः सेवामकरोत् । शत्रूणां प्रतिरोधमकरोत् । अन्ते च शासनकर्त्तृणां गुलिकाभिः प्राणान् अत्यजत् । अतः प्राणपातेनापि देशमातृका सेवनीया ।

### प्रश्नाः

**1. एकेन वाक्येन संस्कृतभाषया मातृभाषया वा उत्तरं लिखत ।**

(क) पिता सर्वदा किमुपदिशति ?

(ख) प्रजामण्डलस्य नेतारः कस्मिन् विषये लोकान् अबोधयन् ?

(ग) केन प्रकारेण देशमातृका सेवनीया ?

**2. एकेन पदेन संस्कृतभाषया मातृभाषया वा उत्तरं लिखत ।**

(क) बाजिः मात्रा पित्रा च सह कुत्र गच्छति ?

(ख) बाजिः कस्याः सेवामकरोत् ?

(ग) कः बाल्यात् मातरि पितरि च भक्तिं करोति ?

(घ) नाविकः कस्मिन् ग्रामे आसीत् ?

●●●

## नवमः अनुच्छेदः

परोपकार: मानवसमाजस्य आधारस्तम्भ: । परोपकारस्य भावनां विना जीवनस्य संचालनमति दुष्करम् । मानवजीवने अनेकानि कष्टानि आयान्ति । कदाचित् रोगी भवति, कदाचित् च दरिद्र: जायते । तस्य मन: दु:खितं भवति । एतस्यामवस्थायां स: सहायतामपेक्षते । सर्वे सहायतां न कुर्वन्ति ।

सज्जनेषु एव परोपकारस्य भावना भवति । दुर्जना: मानवान् पीडयन्ति । सज्जना: परोपकारं कुर्वन्ति । सज्जनानां सर्वस्वं लोकानां कल्याणाय भवति । ते निरक्षरान् साक्षरान् कुर्वन्ति । पथभ्रष्टान् सन्मार्गं प्रदर्शयन्ति । बुभुक्षितानां बुभुक्षां नाशयन्ति । सज्जना: कष्टं न गणयन्ति । राजा शिवि: कपोतस्य प्राणरक्षणाय निजशरीरस्य मांसमददात् । दधीचि: देवानां रक्षायै अस्थीनि अददात् । सप्तर्षय: चौरं रत्नाकरमुपदिश्य वाल्मीकिमकुर्वन् ।

परोपकारस्य एषा भावना प्रकृतौ चापि दृश्यते । नद्य: परोपकाराय वहन्ति । मेघा: परोपकाराय वर्षन्ति । वृक्षा: परोपकाराय फलन्ति । सूर्य: परोपकाराय प्रकाशं ददाति । अत: उचितमेवमुक्तम् ।-

परोपकाराय सतां विभूतय: ।

### प्रश्नाः

**1. एकेन वाक्येन संस्कृतभाषया मातृभाषया वा उत्तरं लिखत ।**

(क) मानवजीवने कानि आयान्ति ?

(ख) दधीचि: देवानां रक्षायै कानि अददात् ?

(ग) वृक्षा: किमर्थं फलन्ति ?

**2. एकेन पदेन संस्कृतभाषया मातृभाषया वा उत्तरं लिखत ।**

(क) के परोपकारं कुर्वन्ति ?

(ख) कथं नद्य: प्रवहन्ति ?

(ग) केषु परोपकारस्य भावना भवति ?

(घ) मानवसमाजस्य आधारस्तम्भ: क: ?

## दशमः अनुच्छेदः

विजयादशमी भारतीयानां पवित्रं पर्व भवति । एतत् पर्व आश्विनमासस्य शुक्लपक्षस्य दशम्यां तिथौ सम्पाद्यते । इयं तिथिः विजयसूचिका मन्यते । अस्मिन् दिवसे श्रीरामः रावणस्य निधनं कृत्वा विजयं प्राप्तवान् । अस्मिन्नेव दिवसे दुर्गा शुम्भं निशुम्भं च अमारयत् । एतत् दिनं विजयेन सम्बन्धितमस्ति । अतः एतत् दिनं विजयादशमी नाम्ना प्रसिद्धम् ।

यद्यपि अयमुत्सवः आश्विनमासस्य शुक्लपक्षस्य दशम्यां तिथौ मान्यते, तथापि उत्सवात् दशदिन-पूर्वमेव रामकथायाः रामलीलायाः संकीर्त्तनादीनां च आयोजनं भवति । जनाः उत्साहेन रामलीलां पश्यन्ति । दशम्यां तिथौ रावणकुम्भकर्ण-मेघनादानां च अग्निसंयोगः क्रियते । सायंकाले रामलीलाक्षेत्रे लोकानां विपुलः समागमः भवति । तस्मिन् समये रामस्य लक्ष्मणस्य हनुमतः च वेशेन कलाकाराः तत्र आगच्छन्ति । हनुमान् च दशहरास्थानमागच्छति । हनुमता कृत्रिमा लङ्का दह्यते । उपस्थिताः जनाः श्रीरामस्य जयध्वनिं कुर्वन्ति । अयमुत्सवः अधर्मस्य उपरि धर्मस्य, असत्यस्य उपरि सत्यस्य, दुर्जनतायाः उपरि सज्जनतायाः विजयस्य प्रतीकमस्ति । वस्तुतः एषः उत्सवः परमपावनः अस्ति ।

### प्रश्नाः

**1. एकेन वाक्येन संस्कृतभाषया मातृभाषया वा उत्तरं लिखत ।**

(क) विजयादशमी उत्सवः कदा सम्पाद्यते ?

(ख) विजयादशमी दिवसे दुर्गा कान् अमारयत् ?

(ग) केन प्रकारेण विजयादशमी उत्सवः विजयस्य प्रतीकमस्ति ?

**2. एकेन पदेन संस्कृतभाषया मातृभाषया वा उत्तरं लिखत ।**

(क) विजयादशमी दिवसे श्रीरामः कस्य निधनं कृतवान् ?

(ख) भारतीयानां पवित्रं पर्व किम् ?

(ग) सायंकाले केषां समागमः भवति ?


(घ) उपस्थिताः जनाः कस्य जयध्वनिं कुर्वन्ति ?

●●●

# चित्राणि पश्यत

# वाक्यानि लिखत ।

### प्रथमं चित्रम्



१. .................................................................................

२. .................................................................................

३. .................................................................................

४. .................................................................................

५. .................................................................................

## द्वितीयं चित्रम्



१. ..........................................................................................

२. ..........................................................................................

३. ..........................................................................................

४. ..........................................................................................

५. ..........................................................................................

## तृतीयं चित्रम्



१. ..........................................................................................


२. ..........................................................................................

३. ..........................................................................................

४. ..........................................................................................

५. ..........................................................................................

## चतुर्थं चित्रम्



१. ........................................................................................

२. ........................................................................................

३. ........................................................................................

४. ........................................................................................

५. ........................................................................................

## पञ्चमं चित्रम्



१. ........................................................................................

२. ........................................................................................

३. ........................................................................................

४. ........................................................................................

५. ........................................................................................